
Scanned

5-3

बहुतोषिणी

बहुतोषिणी हरिशंकरशर्मा



gangamala

लेखक—

हरिशंकरशर्मा

पञ्चमवार २५५०] [मूल्य ॥)

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

केशवानन्द

केशवानन्द

श्री

गंगानन्द

उदासीन

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

ब्रह्मचारी पूर्ण

Swami Tirthanand Saraswati

पू. न. ब्र०

❀ श्रीशिवो जयति ❀

बटुतोषिणी

मिथिलाजनपदान्तर्गतठाढ़ीनिवासि—

पं० श्रीहरिशंकरशर्मसंगृहीता

तेनैव

स्वद्रव्यव्ययेन काश्यां

'मास्टर प्रिण्टिङ्ग वर्क्स' नाम्नि मुद्रणागारे

मुद्रापयित्वा प्रकाशिता।

अस्य पुनर्मुद्रणाधिकारः संग्रहीत्रा स्वायत्तीकृतः

पञ्चमबारे २०००] [सम्वत् १९९७

प्राप्तिस्थानम्—(१) पं० श्रीहरिशंकर झा,

मो० पो० अन्धराठाढ़ी—जिला दरभंगा।

(२) मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ीगली बनारस सिटी।

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

भूमिका

विदितमेतदस्तु पाणिनीयानां यत्केवलपरीक्षादि-
त्सूनां फक्किकामर्मविवृतेर्लेखनप्रणालीचातुर्यं
गुरुशिक्षामन्तरेणासम्भाव्यमिति बहुशो
दर्शंदर्शमयन्तत्प्रथमो भागो रचितः,
अनेन च संक्षेपतः फक्किकामर्म-
विवृतेर्निगूढार्थं ज्ञात्वा विस्तृतार्थे
पाटवं लप्स्यन्ते किमधिकम् ।

हरिशंकरशर्मा ।

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

नमः शिवाय ॐ नमः शिवाय नम नमः

5-3

* ॐ नमः शिवाय *

बटुतोषिणी

बटूनान्दुःखमालोक्य फक्किकाविवृतौ मया ।
प्रवेशाय बटूनां हि क्रियते बटुतोषिणी ॥१॥

[हलन्त्यम्] न विभक्तौ तुस्मा इत्यस्यारम्भसामर्थ्यात् हलंत्यमित्यस्यावृत्तिः, अन्यथा हलन्त्यमादिरन्त्येनेत्यनयोर्वाक्यार्थबोधे परस्परापेक्षत्वेनान्योन्याश्रयाद्बोधाभावेन तद्वैयर्थ्यं स्पष्टमेवेति दिक् १

ननु हकाराकारयोः सवर्णसंज्ञायां ग्रहणकशास्त्रबलात् हकारेणाकारग्रहणात् पक्षौ विश्वपाभिरित्यत्र होढ इत्यनेन ढत्वं तेन कुतो नेति चेन्न, नाज्झलाविति निषेधात् । न च नाज्झलाविति सूत्रे ग्रहणकशास्त्रस्याप्राप्त्या तेन ह्रस्वस्यैव निषेधेऽत्र दीर्घस्य ढत्वं स्यादेवेति वाच्यम्, नाज्झलाविति सूत्रे कालसमयवेलास्विति निर्देशेन आकारस्यापि प्रश्लेषादिति दिक् ॥२॥

ननु तस्मादित्युत्तरस्यादेरिति न्यासेनैव सिद्धे पृथग्योगः परस्येति ग्रहणञ्च किमर्थं इति चेन्न, अष्टौ इत्यत्रानेकाल्शित्सर्वस्येत्यतः परत्वादनेनादेरकारस्यौशादेशे सकारस्य रुत्वे विसर्गे चाष्टौः इति रूपापत्तेः । यथास्थितन्यासे तु आदेः परस्येत्यतः परत्वादनेकाल्शित्यनेन सर्वादेशः सिध्यतीति दिक् ॥३॥

ननु कानि सन्ति कौ स्त इत्यत्र श्नसोरल्लोप इत्यल्लोपे अचः परस्मिन्नित्यनेन वाक्यसंस्कारपक्षे स्थानिवत्त्वेनाच्परत्वाद्यणावादेशौ कुतो नेति चेन्न, न पदान्तेति सूत्रेण पदान्तविधौ स्थानिवत्त्वनिषेधात्, पदसंस्कारपक्षे स्थानिवत्त्वाप्राप्तेश्चेति दिक् ॥४॥ तु

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

कृष्ण+ऋद्धिरिति स्थिते स्थानेऽन्तरतम उरण्रपर इत्यनयोर्बलादाद्गुण इति गुणेनारि अचो रहाभ्यामिति द्वित्वे झरो झरीति लोपे एतयोर्विकल्पे च त्रीणि रूपाणि । तदुक्तं मूले- द्वित्वाभावे लोपे सत्येकधम्, असति लोपे, द्वित्वलोपयोर्वा द्विधम्, सति द्वित्वे लोपे चासति त्रिधमिति ॥५॥

तव+लृकार इति स्थिते, स्थानेऽन्तरतम उरण् रपर इति बलादाद्गुण इति गुणेनालि, अनचि चेति लकारस्य यणो मय इति ककारस्य च द्वित्वे चत्वारि रूपाणि भवन्ति । तदुक्तं मूले- द्वित्वं लस्यैव कस्यैव, नोभयोरुभयोरपि । तवल्कारादिषु बुधै, र्बोध्यं रूपचतुष्टयमिति ॥६॥

[अवेहि] ननु अव+आ+इहीति स्थिते, धातूपसर्गयोः कार्यमन्तरंगमित्यन्तरंगत्वादाद्गुण इति गुणे अन्तादिवच्चेत्यनेन पूर्वान्तवद्भावादाङ्त्वे ओमाङोश्चेति एङि पररूपमिति च पररूपे प्राप्ते परादिवद्भावेनेण्धातुत्वात् एत्येधत्यूठ्स्वित्यनेन वृद्धिप्राप्तौ च वृद्धेः पररूपबाधकत्वेन वृद्धिरेव स्यादिति चेन्न, पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायेन एङि पररूपमित्यस्य बाधेऽपि परत्वादोमाङोश्चेति पररूपस्यैव प्राप्तेः तेनात्र वृद्धिरसाधुरेवेति ॥७॥

[प्रार्च्छति] प्र+ऋच्छतीति स्थिते, स्थानेऽन्तरतम उरण् रपर इति बलादुपसर्गादृतीति वृद्ध्या आरि, अचोरहाभ्यामिति द्वित्वे सिद्धम् । अत्रान्तादिवच्चेत्यनेन पूर्वान्तवद्भावेन पदान्तत्वमादाय खरवसानयोरिति विसर्गमाशंक्य उभयथर्क्ष्वित्यादिनिर्देशेन अन्तवद्भावेन पदान्तरेफस्य न विसर्ग इति ज्ञापनान्नेति समाहितम् । अत्रैव ऋत्यक इति पाक्षिकप्रकृतिभावमाशंक्य उपसर्गेणैव धातोराक्षेपे सिद्धे धाताविति योगविभागेन पुनर्वृद्धिविधानात्पाक्षिक ... स्त्वेति नियमान्नेति समाहितं मूले ॥८॥

[उपेडकीयति] एङि पररूपमिति सूत्रे वा सुप्यापिशलेरि-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

त्यतो वा सुपीत्यनुवर्त्य, वाक्यभेदेन च एङादिसुबन्तप्रकृतिक-धात्ववयवेऽचि विकल्पेन पररूपमित्यर्थे, उप+एडकीयतीति स्थितेऽनेन पररूपे सिद्धम् । पक्षे वृद्धिरेचीति वृद्धौ सिद्धम् ॥१०॥

[अचि किं कुमारी शेते] अयं भावः, अकः सवर्णे इति सूत्रेऽचीत्यस्याननुवृत्तौ ईकारशकारयोः सवर्णसंज्ञायां कुमारी शेते इत्यत्रापि दीर्घापत्तेः । नाज्झलाविति निषेधस्तु न; आक्षरसमाम्नायिकानामेव निषेधविधानात् । अणुदिदितिशास्त्रस्य तु सावर्ण्यविधिनिषेधाभ्यां पूर्वमनिष्पत्त्या नाज्झलावित्यत्राप्रवृत्तेः॥

[होतृकारः] होतृ+ऋकार इति स्थिते, ऋति सवर्णे ऋ वेत्यनेन द्विमात्रिक ऋ-आदेशे सिद्धम् । पक्षे ऋत्यक इति प्रकृतिभावे होतृ ऋकारः, एतद्विकल्पे सवर्णदीर्घे होतृकार इति । तदुक्तं मूले "आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा, अभितोऽज्भक्तेरपरामात्रे"ति ॥११॥

[अर्थग्रहणं किम्] ननु सूत्रारम्भसामर्थ्यात्, ईदूतौ च सप्तमीप्रगृह्यम्, अदसः, एचद्विवचनमिति लघुभूतन्यासेनैव सिद्धे गुरुभूतन्यासाच्च संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणन्नास्तीति परिभाषया अप्राप्त्या प्रत्ययग्रहणपरिभाषया तदन्तविधौ ईदूदन्तं यत्सप्तम्यन्तमित्याद्यर्थेनैव प्रत्ययलक्षणेन सोमो गौरी अधिश्रित इत्यादिसिद्धौ ईदूतौ च सप्तम्यर्थे इति सूत्रेऽर्थग्रहणं व्यर्थमिति चेन्न, सप्तम्यर्थमात्रे पर्यवसन्नं यदीदूदन्तन्तदेव प्रगृह्यमित्यर्थ—ज्ञापनेन चारितार्थ्यात् । तेन वाप्यामश्वो वाप्यश्व इति समासे वापीनिष्ठाधिकरणतानिरूपिताधेयतावानश्व इत्यर्थे प्रगृह्यत्वन्नेति संक्षेपः ॥१२॥

[टोः किम्] ननु षकारस्य पदान्ते जश्त्वविधानात्तत्र ष्टुत्वनिषेधस्येष्टतया टोर्ग्रहणं व्यर्थमिति चेन्न, सर्पिष्टममित्यत्र ह्रस्वात्तादौ तद्धिते इति षत्वस्य जश्त्वं प्रत्यसिद्धतया जश्त्वाप्राप्तौ साम्प्रतं ष्टुत्वनिषेधापत्तेः ॥१३॥

[चतुर्मुखः] ननु स्थानेऽन्तरतम उरण् रपर इति संहितायां

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

प्रथमान्तपाठेऽन्तरतम आदेशो भवतीत्यर्थे चतुर्मुख इत्यत्र रेफस्य स्थानमात्रसादृश्येनान्तरतमो णकाररूपानुनासिकः कुतोनेत्या-शंक्य सप्तम्यन्तपाठेन समाधयति स्थानप्रयत्नाभ्यामित्यादिनेति प्राचीनाः । नवीनास्तु सप्तम्यन्तपाठस्य सुद्ध्युपास्य इत्यादौ (दीर्घे) यणसिध्या भाष्ये दूषितत्वेन चतुर्मुख इत्यत्र णकारः कुतो नेत्याशंक्य यरोऽनुनासिक इति सूत्रे अनुस्वारस्य ययीति सूत्रात्सवर्णपदानुवृत्त्या सवर्णोऽनुनासिको भवतीत्यर्थे रेफोष्मणां सवर्णा न सन्तीति भाष्यबलान्नेति समादधुः ॥१४॥

सम्+स्कर्त्तेति स्थिते, समः सुटीति मस्य रुत्वे अत्रानुनासिक-इत्यनुनासिके पक्षे अनुनासिकात्परोऽनुस्वार इत्यनुस्वारे खरवसा-नयोरिति विसर्गे, संपुंकानामिति सत्वे संस्स्कर्त्ता सँस्स्कर्त्तेति । अत्र समो वा लोपमेके इति भाष्यबलान्मलोपपक्षेऽपि अनुनासिकानु-स्वाराभ्यामेकसकारकरूपद्वयं पूर्वोक्तरूपद्वये च, अनचि चेति सका-रस्य शरः खय इति ककारस्य अनचिचेत्यनुस्वारस्य अचोरहाभ्यां द्वे यणो मय इति च तकारस्य द्वित्वे चतुष्पंचाशत् । एषु अणोऽप्र-गृह्यस्येत्यनुनासिकविकल्पेऽष्टोत्तरशतं रूपाणीति दिक् ॥१५॥

पुम्+कोकिल इति स्थिते, पुमः खय्यम्पर इति रुत्वे अनु-नासिके पक्षेऽनुस्वारे च, विसर्गे; व्युत्पत्तिपक्षेऽप्रत्ययस्येति षत्वपर्युदासादिदुदुपधस्येति षत्वाप्राप्तौ कुप्वोरिति जिह्वामूलीये, अव्युत्पत्तिपक्षे षत्वे च प्राप्ते तौ प्रबाध्य; संपुंकानामिति सत्वे पुँस्कोकिलः पुंस्कोकिल इति सिद्धम् ॥१६॥

[पुंख्यानम्] चक्षिङो ल्युटि अनादेशे चक्षिङः ख्याञा-देशे, खशादिरयमादेश इति भाष्यबलेन शस्य यो वेति शकारस्य यकारे रुत्वं प्रति यत्वस्यासिद्धत्वेनाम्परत्वाभावेन पुंख्यान-मित्यत्र पुमः खयीति रुत्वन्नेति संक्षेपः ॥१७॥

[वासः क्षौमम्] अत्र विसर्जनीयस्य सः, शर्परेविसर्जनीयः,

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

कुप्वोः ≍क≍पौचेत्येतेषां प्राप्तौ, येन ना प्राप्तौ यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायेन जिह्वामूलीयेन सत्वस्य बाधेऽपि, परत्वात् शर्परे विसर्जनीय इति विसर्ग एवेत्याशयः ॥१८॥

[कृत्वोर्थे किम्] ननु द्वित्रिभ्यां सुजन्ताभ्यां साहचर्याच्चतुःशब्दोऽपि सुजन्त एव ग्रहीष्यत इति चतुष्कपाल इत्यत्र न दोष इति चेन्न, साहचर्यपरिभाषाया अनित्यत्वज्ञापनेन चारितार्थ्यात्॥१९॥

[मातुः कृपा] कस्कादिषु भ्रातुष्पुत्रशब्दपाठेन एकादेशशास्त्रनिमित्तकस्य न षत्वमिति ज्ञापनेन, प्रकृते एकादेशशास्त्रभूत उदिति, परम्परया तन्निमित्तकस्य विसर्गस्य इदुदुपधस्येति षत्वाभाव इति दिक् ॥२०॥ अप्रत्ययस्य किम् – वायुः करोति,

[अग्निः करोति,] ननु स्थानिवत्सूत्रं प्रति त्रिपाद्या असिद्धत्वात्तत्कर्त्तव्ये स्थानिवद्भावाप्राप्त्या प्रकृते इदुदुपधस्येति-सूत्रेऽप्रत्ययग्रहणसत्वेऽपि षत्वं कथन्नेति चेन्न अनेनैव वतिघटितातिदेशानां त्रिपाद्यामपि प्रवृत्तिरिति ज्ञापनेनादोषात् । अत एव राम इत्यादौ विसर्गसिद्धिः ॥२१॥

ननु स्वौज समौडित्यनेन रोर्विधानेऽपि पथिमथ्यृभुक्षामादित्यत्र दीर्घोच्चारणेन शौ परे दीर्घो नेति कल्पनेन, राम इत्यादौ सुपिचेत्यस्याप्राप्त्या दोषाभाव इति चेन्न; यशोऽत्र पयोऽत्रेत्यत्रोत्त्वं प्रति रुत्वस्यासिद्धत्वादुत्वानापत्तेः उत्वविधानस्य तु रुविधानवादिमते शिवोऽर्च्य इत्यादौ चारितार्थ्यादित्याशयेनाह स्वौजसमौडिति॥२२॥

शिवेति प्रातिपदिकात्स्वौजसमौडिति सुप्रत्यये शिवस् अर्च्य इति स्थिते जश्त्वं बाधित्वा रुत्वे ऽतो रोरप्लुतादप्लुत इत्युत्त्वे प्रथमयोरिति दीर्घस्य नादिचीति निषेधे आद्गुण इति गुणे एङः पदान्तादितिपूर्वरूपे शिवोऽर्च्य इति सिद्धम् ॥२३॥

ननु देवाः सन्तीत्यत्र यत्वस्यासिद्धत्वाद्विसर्ग एव भविष्यतीति भोभगो इति सूत्रेऽशीतिव्यर्थमिति चेन्न, विसर्गस्य

यद्यपि यत्वस्यासिद्धत्वाद्विसर्गः स्यात्तथापि

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

स्थानिवद्भावेन रुत्वाद्युत्वापत्तेः । अनल्विधाविति निषेधस्तु न शंक्यः रोरितिसमुदायरूपाश्रयणादिति संक्षेपः ॥२४॥

ननु ढ्लोप इतिसप्तमी श्रुत्या तस्मिन्निति परिभाषया पूर्वस्योपस्थित्या सिद्धे पूर्वग्रहणं व्यर्थमिति चेन्न, अलुगुत्तरपदे इत्यतउत्तरपदानुवृत्त्योत्तरपदशब्दस्य समासचरमावयवेरूढतया, लिहो ढौकनं लीढौकनं रक्तान्निर्गतं नीरक्तमित्यत्र सूत्रस्य चारितार्थ्येऽपि अजर्घा लीढ इति भाष्यप्रयोगे पुनारमत इत्यादौ च दीर्घानापत्तेः ॥२५॥

ननु राजन्-ङस्-पुरुष-सु इति समुदायस्य प्रत्ययान्ततदादिभिन्नत्वेन, अर्थवदितिप्रातिपदिकत्वे सिद्धे कृत्तद्धितेतिसूत्रे समासग्रहणं व्यर्थमिति चेन्न, यत्र संघाते पूर्वो भागः पदन्तस्य चेद्भवति तर्हि समासस्यैवेति नियमार्थत्वात् । तेन राज्ञः पुरुष इत्यादिवाक्ये प्रातिपदिकत्वन्न । न चैवमपि समासग्रहणं व्यर्थमेवेति वाच्यम्, यावतां विना ऽनुपपत्तिस्तावत्सर्वं ज्ञापयतीति न्यायबलेन पूर्वभागपदघटितसंघातातिरिक्तस्यैवार्थवतो ग्रहणमिति बोधनेनादोषादिति दिक् ॥२६॥

ननु प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया रमा-गौरीत्यादौ स्वादेः सिद्धतया ङ्याप्प्रातिपदिकादितिसूत्रे ङ्याप्ग्रहणं व्यर्थमितिचेन्न, ङ्यन्तादाबन्तात्तद्धितोत्पत्तिर्यथा स्यात् ङ्याब्भ्यां प्राङ्माभूदिति बोधनार्थत्वात् । तेन आर्यिका आर्यकेत्यत्रोदीचामातः स्थाने यकपूर्वाया इतीत्त्वविकल्पसिद्धिः । लोहिनिकालोहितिकेत्यत्र वर्णादनुदात्तात्तोपधात्तो न इति ङीप्नकारादेशौ विकल्पेन सिद्धौ । अन्यथा स्वार्थिकत्वेनान्तरङ्गत्वात्कनि उक्तरूपासिद्धेरिति दिक् ॥२७॥

येन विना यदनुपपन्नं तेन तदाक्षिप्यते इति न्यायेन सम्बुद्ध्या अंगाक्षेपे, येन यदाक्षिप्यते तस्य तत्रैवान्वय इति न्यायेन सम्बुद्धावेवान्वये, अंगात्परा या सम्बुद्धिस्तदवयवो हल्लुप्यते सचैङ्ह्रस्वाभ्यां परीभूतश्चेदित्यर्थे च हे कतरित्यत्रातिव्याप्तिः, हे कुलेत्यत्र पूर्वरूपो

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

त्तरं पूर्वान्तवद्भावेनांगत्वेऽपि ततःसम्बुद्धेरभावादव्याप्तिश्च स्यादतो लक्ष्यानुरोधादन्यत्राप्यन्वय इत्याशयेनाह—सम्बुद्ध्याक्षिप्तस्येति ॥

नन्तु अपरनिमित्तकत्वेनान्तरंगत्वात्सम्बुद्धिलोपे प्रत्ययलक्षणेन ह्रस्वस्य गुण इति गुणे हे हरे इत्यादि सिद्धौ, एङ्ह्रस्वादितिसूत्रे एङ्ग्रहणं व्यर्थमिति चेन्न; परत्वान्नित्यत्वादपवादत्वाद्वा सम्बुद्धिगुणे ह्रस्वात्परत्वाभावेन लोपानापत्तेः ॥२९॥

यस्मात्प्रत्ययविधिरितिसूत्रे विधिग्रहणाभावे इदं शब्दात्किमिदंभ्यां वो घ इति वतुपि वकारस्य घत्वे चाऽयनेयीति इयादेशे इदंकिमोरीश्कीतीशादेशे यस्येति लोपे उगितश्चेति ङीपि स्त्री+इयतीति स्थिते इयत्प्रत्ययस्य स्त्रीशब्दात्परत्वेन तस्मिन्परेऽङ्गत्वे स्त्रिया इत्यनेनेयङापत्तेः असिद्धवदत्रेति असिद्धत्वन्तु न समानाश्रयत्वाभावादिति दिक् ॥३०॥

अत्र सूत्रे प्रत्यय इत्यस्याभावे रामाभ्यामित्यादौ विशिष्टस्याङ्गत्वेऽ(प्य)तो सुपि चेति दीर्घानापत्तेः । न च यजादिसुब्व्यवहितपूर्वस्याङ्गावयवस्यातो दीर्घ इत्यर्थान्न दोष इति वाच्यम्; देवदत्त ओदनमपाक्षीदित्यत्र देवदत्तोत्तरं सुपं निमित्तीकृत्य लुङ्पर्यन्तस्याङ्गत्वे देवात्पूर्वमडागमापत्तेरिति दिक् ॥३१॥

ननु प्रत्ययः परश्चेतिनिर्देशेन सावेत्वन्नेतिकल्पनाद्राम इत्यादौ दोषाभावेन बहुवचने झल्येदित्यत्र बहुवचनग्रहणं व्यर्थमिति चेन्न रामस्येत्यत्र दोषापत्तेः न चात्र 'अस्य'-विधानेनादोष इति वाच्यम् तथा सति इदम् शब्दस्य अस्येत्यनापत्तेः । न च टौसोरनकः आपि लोप इति न्यासेन दोषाभावाद्बहुवचनग्रहणं व्यर्थमेवेति वाच्यम्, रामाभ्यामित्यत्रैत्वापत्तेःसुपि चेति सूत्रन्तु रामायेत्यत्र चरितार्थम् । ङेरय इति करणे तु रामाभ्यामित्यत्रेव रामेभ्य इत्यत्रापि दीर्घापत्तेः एत्वविधानस्य रामेष्वित्यत्र चारितार्थ्यमिति तत्त्वम् ॥३२॥

ननु उतो वृद्धिर्लुकि हलीत्यतो हलीत्यनुवृत्त्या रामा इत्यादौ

बहु० इति सूत्रे २ — रामभ्यां इति सिद्ध तथा

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

दोषाभावेनात्र झलीति व्यर्थमिति चेन्न, रामाणामित्यत्र दोषापत्तेः। न च सन्निपातपरिभाषयाऽत्र न दोष इति वाच्यम्; (अनेनैव झलिग्रहणेनैत्त्वे सन्निपातपरिभाषाया अप्रवृत्तिज्ञापनात्। अत एव सर्वेषामित्यत्रैत्वसिद्धिरिति दिक् ॥३३॥)

नन्तु इण्कोरित्यधिकार–सूत्रं विधिसूत्रं मत्वा आदेशप्रत्ययोरितिसूत्रं व्यर्थमिति चेन्न, सुपीः सुपिसौ सुपिस इत्यत्रापि षत्वापत्तेः। न च शासिवसिघसीनाञ्चेतिसूत्रं धातोः सस्य यदि षत्वं स्याच्चर्हि एषामेवेति नियमार्थमिति प्रकृते न दोष इति वाच्यम्, उक्तनियमे सिषेधेत्यादौ षत्वानापत्तेरिति दिक् ॥३४॥

ननु सर्वादिप्रयुक्तकार्याणामेकवचनबहुवचनयोरेव विधानादत्रोभशब्दपाठो व्यर्थ इति चेन्न, उभकावित्यत्राव्ययसर्वनाम्नामकजिति अकज्विधानार्थन्तस्याऽवश्यकत्वात्। न च स्वार्थे कप्रत्ययेनोक्तरूपसिद्धिरिति वाच्यम्, द्विवचनपरत्वाभावेनोभयत उभयत्रेत्यादाविवात्रापि उभादुदात्तो नित्यमित्यत्र नित्यमिति योगविभागेनायच्प्रसङ्गात्, अकचि तु तन्मध्यपतितन्यायेन द्विवचनपरत्वान्न दोष इति दिक् ॥३५॥

उभयोऽन्यत्रेतिवार्तिकस्योभयोमणिरुभये देवमनुष्या इत्युदाहरणदानपरकभाष्येण उभयशब्दस्य तद्धितश्चासर्वविभक्तिरित्यनेनाव्ययसंज्ञावारणार्थन्तसिलादय इत्यादिपरिगणनेन चोभयशब्दस्य द्विवचने रूपमनभिधानमिति कैयटाशयः। न चोदाहरणमादरणीयमिति भाष्येण पचतिरूपं पचतिकल्पमिति परिगणनफलदानेन च द्विवचने रूपं भवत्येवेति हरदत्ताशयः॥३६॥

उभाववयवौ येषामित्यर्थे संख्याया अवयवे तयबिति तयपः उभादुदात्तो नित्यमित्ययजादेशे ततो जसि स्थानिवत्त्वेन तयप्प्रत्ययान्ततया प्रथमचरमेति विकल्पेन प्राप्तसंज्ञाया विभक्तिनिरपेक्षत्वेनान्तरङ्गत्वात्सर्वादीनीत्यनेन सर्वनामसंज्ञांप्रत्यसिद्धत्वादनेन

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

नित्यं संज्ञायां जसः शीति श्यादेशे गुणे च उभये इति सिद्धम्॥३७॥

त्वकं पिता यस्य० अहकं पिता यस्येति लौकिकविग्रहे युष्मद् सु-पितृ सु, अस्मद् सु पितृ सु, इत्यलौकिकविग्रहे बहुव्रीहिसमासात्प्रागेव न बहुव्रीहाविति सर्वनामसंज्ञानिषेधेऽकचोऽप्राप्त्या के, प्रत्ययोत्तरपदयोश्चेति त्वमादेशे नद्यृतश्चेति कपि त्वत्कपितृको मत्कपितृक इति सिद्धम् । न बहुव्रीहावित्यस्याभावे भवकन्तमतिक्रान्तोऽतिभवकानित्यत्रैव समासेऽप्यकचः श्रवणापत्तावुक्तरूपासिद्धेरितिपाणिनिमतम् । भाष्यकारस्तु अकच्स्वरौ तु कर्त्तव्यौ प्रत्यङ्गं मुक्तसंशयावित्युक्त्वा त्वकत्पितृको मकत्पितृक इति रूपे, इष्टापत्तिं कृत्वा न बहुव्रीहाविति सूत्रं प्रत्याचख्यौ, एवं च यथोत्तरं मुनीनां प्रामाण्यमिति बलाद्भाष्यकारमतस्यैव प्रामाण्यमिति दिक्॥३८॥

वर्णश्चाऽऽश्रमश्चेतरश्चेत्येतेषामितरेतरयोगद्वन्द्वादामि सर्वाद्यन्तत्वेन सर्वादीनीतिप्राप्तसंज्ञाया द्वन्द्वे चेति निषेधे सुटोऽप्राप्त्या नुटि दीर्घे णत्वे च वर्णाश्रमेतराणामिति । नचानेन समुदायस्य निषेधेऽपि अवयवस्य निषेधाभावात् आमि सर्वनाम्न इति सूत्रे तदन्तविधिना अवर्णान्तसर्वनामान्तात्परस्यामः सुडित्यर्थे सुट् स्यादेवेति वाच्यम्, सर्वनाम्नो विहितस्यामः सुडिति भाष्यव्याख्यानाददोषात्॥३९॥

[निर्जरसा] इनादीन्बाधित्वा परत्वाज्जरसिति दीक्षितमते, निर्दिश्यमानस्यादेशा भवन्ति, एकादेशविकृतमान्यवदिति परिभाषाभ्यां जराया जरसिति जरसादेशे निर्जरसेत्यादि । अत्र प्राचीनाः विप्रतिषेधे परमित्यत्र परशब्दस्येष्टवाचित्वादिष्टं च कार्यं पूर्वविप्रतिषेधेनेनाद्यादेशरूपम्, तेन पूर्वविप्रतिषेधेनेनाद्यादेशे सन्निपातपरिभाषाया अनित्यत्वाज्जरसादेशे निर्जरसिन निर्जरसात् निर्जरसैः ङसि निर्जरस्येत्याहुः, तद्भाष्यविरुद्धम् । तथाहि बहुवचने झल्येत्, आङि च, ओसि च, आपः सम्बुद्धावित्येवं योगं विभज्य इनेकारः प्रत्याख्यातः । एवमकारोच्चारणसामर्थ्यात्पर-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

तुकत्वा रूपाभावे सवर्णदीर्घेणैव रामादिति सिद्धौ, आति दीर्घोच्चारणं च प्रत्याख्यातम् । अन्यथा निर्जरसिनेत्यादिसिद्धये इकारदीर्घो-च्चारणयोरावश्यकत्वेन प्रत्याख्यानासंगतिः स्पष्टैव । एवमतिज-रैरिति भवितव्यं, सन्निपातपरिभाषयेति भाष्यमपि विरोधे योज-नीयम् ।(अत्रत्यमतविचारो न बटूनामुपयोगी) ति दिक् ॥४०॥

यूषशब्दस्य शसादौ पद्दन्निति यूषन्नादेशे भत्वादल्लोपो न इत्यल्लोपे रषाभ्यामिति णत्वे यूष्ण इत्यादि । नचात्राचः परस्मिन्नितिसूत्रे पूर्वस्माद्विधिरिति पञ्चमीसमासपक्षे, अल्लोपस्य स्थानिवत्त्वेन व्यवधानात्कथं णत्वमिति वाच्यम्, तथा सति अड्व्यवाय इत्येव सिद्धेः । त्रिपादीस्थे कार्ये न स्थानिवदित्यर्थ-कपूर्वत्रासिद्धीये न स्थानिवदिति निषेधस्तु न, संयोगादिलोपल-त्वणत्वेषु तदप्रवृत्तेरिति दिक् ॥४१॥

द्वयोरह्नोर्भव इत्यर्थे तद्धितार्थोत्तरेति समासे कालाट्ठञिति-ठञो द्विगोर्लुगनपत्ये इति लुकि, राजाहः सखिभ्यश्चेति टचि टिलोपं बाधित्वा समासान्ते अह्नोऽह्न इत्यह्नादेशे प्रातिपदिकत्वान्ङौ संख्याविसायेति अहन्ना-देशे विभाषा ङिश्योरित्यल्लोपे द्व्यह्नि पक्षे द्व्यहनि । अहन्ना-देशविकल्पे आद्गुण इति गुणे द्व्यह्न इति ॥४२॥

शेषो घ्यसखीति सूत्रे यूशब्दानुवृत्तौ मात्रे इत्यत्रापि घि संज्ञायां घेर्ङितीति गुणापत्तेः । न च ऋतोङिसर्वनामस्थानयोरि-तिसूत्रे ङिग्रहणेन ऋदन्तस्य यदि ङिति सुपि गुणः स्यात्तर्हि ङावेवेति नियमान्न दोष इति वाच्यम् । हरिश्च हरश्चेति द्वन्द्वे हरशब्दस्यापि घिसंज्ञकत्वेन द्वन्द्वे घीति पूर्वनिपातापत्तेः ।

[दीर्घात्कि.सू.] निष्कौशाम्बिरतिखट्व इत्यत्र गोस्त्रियोरिति ह्रस्वे स्थानिवत्त्वेन ङ्याप्त्वाप्त्वेआदायसुलोपापत्तेः; दीर्घग्रहणेकृते तु दीर्घत्वधर्मस्याल्मात्रवृत्तित्वेनानल्विधाविति निषेधान्न दोष इति

ननु अनङ्सावित्यत्र सोर्ङिति न्यासेन सखेति सिद्धौ हल्ङ्या-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

विति सूत्रे हल्ग्रहणं व्यर्थम्, राजेत्यादौ संयोगान्तलोपेनैव सिद्धेरिति चेन्न, संयोगान्तलोपस्यासिद्धत्वान्नलोपानापत्तेरिति दिक् ॥४५॥

शोभनः सखेत्यर्थे समासात्सौ अनङ्सौ सख्युरसम्बुद्धाविति सूत्रयोरांगत्वात्तदन्तेऽपि प्रवृत्त्या सुसखा । (हे) सुसखायावित्यादि । एवं शोभनः सखा यस्येति बहुव्रीहावपि सुसखेत्यादि । (नचान्यपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वमुपसर्जनत्वं गौणत्वं चेति प्राचीनमते गौणत्वाद्गौणमुख्ययोर्मुख्ये कार्यसंप्रत्यय इति परिभाषया कथमत्रानयोः प्रवृत्तिरिति वाच्यम्, स्त्रीत्वानिमित्तत्वे सति सुब्विभक्त्यनिमित्तकत्वं पदकार्यत्वन्तत्रैवोक्तपरिभाषा प्रवर्त्तते न तु प्रातिपदिककार्ये इत्यदोषात्) अस्य सुसखिसमुदायस्य-सखिभिन्नत्वेन घिसंज्ञायां नाद्यादेशे सुसखिना सुसखये इत्यादि ॥४६॥

सखीमतिक्रान्त इत्यर्थे समासे घटघटीग्रहणेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वाद्राजाहः सखिभ्यष्टजिति टचोऽप्राप्तया गोस्त्रियोरिति ह्रस्वे समासात्स्वादौ लाक्षणिकत्वेन अनङ् सावित्यादेरप्राप्तौ अतिसखिरित्यादि हरिवत् ॥४७॥

[द्विपर्यन्तानां किम्] एतन्नियमाभावे सर्वादिपठितभवच्छब्दस्य सौ त्यदादीनाम इत्यत्वे पररूपे च भव इति स्यात् न च सत्यप्यत्वे स्थानिवत्त्वेनैकदेशविकृतन्यायेन वा उगित्वान्नुम् स्यादेवेति वाच्यम् । शमी शमिनाविति घिनुणन्ते नुमोऽभावाय झल्ग्रहणमपकृष्य उगिज्झलन्तस्यैव नुम्विधानेनात्र तदप्रवृत्तेः न च त्यदादितः पूर्वमेव भवच्छब्दस्य पाठकरणेनादोष इति वाच्यम् । स च भवांश्चेत्येकशेषे सिद्धान्ते त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते इति वचनाद्भवन्ताविति । अधुना त्यदादीनि सर्वैर्नित्यमिति वचनात्ताविति त्यापत्तेः ॥४८॥)

ननु दुर्धिय इत्यत्र गतिपूर्वकत्वात् वृश्चिकभिय इत्यादौ कारक-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

पूर्वकत्वाच्च एरनेकाच इति यण् कुतो नेति चेन्न, उपसर्गाः क्रियायोग इति सूत्रे योगग्रहणेन यत्क्रिया-युक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञेति नियमात्; दुःस्थिता धीर्येषामित्यर्थे दुरित्यस्य धीशब्दार्थं प्रति गतित्वाभावात्। एवं वृश्चिकाङ्गीः वृश्चिकभीरिति बुद्धिकृतमपादानत्वं नेह विवक्षितम् किन्तु वृश्चिकस्य भीः वृश्चिकभीः अथवा वृश्चिकसम्बन्धिनी भीर्वृश्चिकभीरिति शाकपार्थिवादीनामित्युत्तरपदलोपिसमासे इति यणोऽप्राप्तिरिति दिक् ॥४९॥

[उत्तरपूर्वस्यै] उत्तरस्याः पूर्वस्याश्च दिशोरन्तरालं दिगित्यर्थे दिङ्नामान्यन्तराल इति समासान्ङेविभक्तौ विभाषा दिक्समासे बहुव्रीहाविति विकल्पेन सर्वनामत्वे स्याडादिकार्ये सिद्धम्, पक्षे याडादिकार्ये उत्तरपूर्वायै इति। अत्र प्रतिपदोक्तदिङ्नामानीतिविहितदिक्समासस्य ग्रहणात् योत्तरा सा पूर्वा यस्या इत्यर्थे अनेकमन्यपदार्थे इति बहुव्रीहौ सर्वनामत्वाप्राप्त्या उत्तरपूर्वायै इत्येवेति ५०

[जरसौ] अत्र परत्वाज्जरसादेश इतिदीक्षितमतम् प्राचोनास्तु पूर्वविप्रतिषेधेन जरसादेशात्पूर्वं श्यादेशे सन्निपातपरिभाषाया अनित्यत्वमाश्रित्य जरसादेशे जरसी इत्याहुस्तन्निर्मूलमिति निर्जरशब्दे उक्तम्। न च दीक्षितमतेऽपि जरसादेशस्य स्थानिवत्त्वेनाबन्तत्वमादाय श्यादयः स्युरेवेति वाच्यम्, आ आविति प्रश्लिष्य आकाररूपस्यैवापः सर्वत्र ग्रहणेनाल्विधित्वात्स्थानिवत्वाप्राप्तेः ॥५१॥

[अतिखट्वाय] ननु याडाप इति सूत्रे आकारप्रश्लेषेऽपि अत्र दीर्घोत्तरमाकाररूपत्वस्य विद्यमानत्वेन स्थानिवत्वेनाप्त्वमाश्रित्य याट् कुतो नेति चेन्न, स्त्रीप्रत्यये चानुपसर्जनेनेति बलात् आवन्तं यत्तदादि तद्रूपादङ्गात्परस्य याडित्यर्थेनादोषात् ॥५२॥

[स्त्रियामिति त्रिचतुरोः] अयं भावः श्रुतानुमितयोः श्रुतसम्बन्धो बलवानिति न्यायेन स्त्रियामित्यस्य त्रिचतुरोरेव विशेषणत्वमत्वङ्गस्य तेन प्रियास्त्रयस्त्रीणि वा यस्या इत्यर्थे प्रियत्रिश-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

ब्दस्य मन्त्रिवद्रूपम्। आमि प्रियत्रयाणामिति विशेषः। प्रियास्तिस्रो यस्येत्यर्थे तिस्रादेशे प्रियतिसा प्रियतिस्रावित्यादि। प्रियास्तिस्रो यस्य तत्कुलमित्यर्थे स्वमोर्लुक्यपि न लुमतेति निषेधस्यानित्यत्वात्पक्षे तिस्रादेशे प्रियत्रि प्रियतिसृ इति। अन्यत्र रादेशात्पूर्वविप्रतिषेधेन नुमि प्रियतिसृणी इत्यादि टादौ तृतीयादिष्विति पुंवद्भावे प्रियतिस्रा प्रियतिसृणेत्यादीति दिक्॥५३॥ अज्जादौ प्रत्यये

[अतिस्त्रियै] स्त्रियमतिक्रान्तायै इत्यर्थे समासान्ङे विभक्तौ ङितिह्रस्वश्चेतिह्रस्वान्तत्वान्नदीसंज्ञाविकल्पः। अस्त्रीति निषेधस्तु नाशंक्यः, तस्येयङुवङ्स्थानावित्यनेन संबद्धतया दीर्घस्यैव निषेधकत्वन्न तु ह्रस्वस्य। तत आटि वृद्धौ इयङादेशे च सिद्धम्। पक्षे गुणे अतिस्त्रये इति॥५४॥ इह

[प्रधीशब्दस्येति] आध्य प्रध्यै ब्राह्मण्यै इति भाष्यप्रयोगेण पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वमिति वृत्तिकारमते प्रकृष्टं ध्यायतीत्यर्थे प्रधीशब्दस्य नित्यस्त्रीलिंगतया लक्ष्मीवद्रूपम्। उक्तभाष्यप्रयोगे बहुव्रीहिमाश्रित्य लिंगान्तरानभिधायकत्वंनित्यस्त्रीत्वमितिकैयटमतेउक्तेऽर्थेप्रधीशब्दस्यपुंवद्रूपम्। प्रकृष्टाधीरित्यर्थे उभयमते लक्ष्मीवद्रूपम्। एवं सुष्ठु ध्यायतीत्यर्थे सुधीशब्दस्य वृत्तिकारमते लक्ष्मीवत्, कैयटमते पुंवत्। ग्रामणी कटप्रू खलपू इत्यादीनामुभयमतेऽपि पुंवदेव, ग्रामनयनादेः स्वभावतः पुंसो धर्मत्वात्। अन्यत्सर्वं सुस्पष्टमिति दिक्॥५५॥ प्रकृष्टा धीर्यस्याः सा, प्रकर्षेण ध्यातीति वेत्यर्थे च सुष्ठु धीर्यस्याः सेति अर्थे च सुष्ठु धीरित्यर्थे तूभयमते च ल०

[प्रराणाम्] प्रकृष्टो रा यस्मिन्कुले इत्यर्थे समासादामि ह्रस्वो नपुंसके, एच इग्घ्रस्वादेश इति ह्रस्वे नुमचिरेति बलान्नुटि रायो हलीत्यात्वे सिद्धमिति माधवः। सिद्धान्ते तु सन्निपातपरिभाषाविरोधान्नुट्यात्वाभावे दीर्घे च प्रराणामित्येव। दीर्घे कर्त्तव्ये सन्निपातपरिभाषा न प्रवर्त्तते दीर्घविधानसामर्थ्यात्॥५६॥ नामीति अनवकाशत्वात्

[उपदेशे किम्] भाष्येधुगित्यत्र घत्वस्यासिद्धत्वाड्ढत्वं प्राप्नो-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

तीत्याशंक्य अपवादत्वाद्घत्वमिति समाधाय अथवा होडोऽदादेः, धातोर्घ, इति योगं विभज्य उत्तरयोगे नञ्-रहितदादिंपदानुवृत्ति-रित्युक्तम् । तदनुवृत्तिर्व्यर्था सती उपदेश इत्यर्थं बोधयति तदभावे अधोगित्यत्र सत्यडागमे दादित्वाभावाद्धत्वं न स्यादित्यव्याप्तिः, दामलिहमात्मन इच्छति दामलिह्यति ततः क्विपि अल्लोपयल्लोपे प्रातिपदिकत्वात्सौ सुल्लोपे दामलिडित्यादौ दादित्वेन घत्वं स्यादित्यव्याप्तिरित्याशयः ॥५७॥

अनडुहशब्दात्सौ चतुरनडुहोरित्यामि इकोयणचीतियणिसा-वनडुह इति नुमि सुलोपे संयोगान्तलोपे तस्यासिद्धत्वान्नलोपा-भावे नुम्विधिसामर्थ्याद्वसुस्रंस्विति दत्वाभावे अनड्वानिति सिद्धम् । अत्र विशेषविहितेन नुमा सामान्यविहितस्यामस्तक्र-कौण्डिन्यन्यायेन बाधात्कथमामिति न शंक्यम्, आच्छीनद्यो-रितिसूत्रादादित्यनुवृत्त्या अनडुह्शब्दसम्बन्ध्यावर्णात्परोनुमित्यर्थे उपजीव्यविरोधेनाबाधादिति दिक् ॥५८॥

चतुर्शब्दादामि षट्चतुर्भ्यश्चेति नुटि रषाभ्यामिति णत्वे अचो रहाभ्यामिति द्वित्वे चतुर्णां चतुर्ण्णामिति । ननु पूर्वत्रा—सिद्धीयमद्विर्वचने इति वलाण्णत्वं प्रति द्वित्वस्यासिद्धत्वाभावा-त्परत्वाद्द्वित्वे णत्वं युक्तमिति चेन्न, द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यमिति वार्तिकारम्भसामर्थ्याद्वर्णद्विद्वत्वे तदप्रवृत्तेः । न च वाक्कृत्राग्गिपि भाष्योदाहरणेन वर्णद्वित्वेऽपि तत्प्रवृत्तिरावश्य-कीति वाच्यम्, द्वित्वे कर्तव्येऽन्यदसिद्धन्न द्वित्वन्त्वसिद्धमेवे-त्यर्थकरणेनादोषादिति दिक् ॥५६॥

किमः कः इति सूत्रे इमोऽः इति न्यासे त्यदाद्यनुवृत्त्या त्यदा-देरिमोऽः स्यादित्यर्थेनैव सिद्धे ककारोच्चारणं व्यर्थं सत् अकच् सहितस्याप्ययमादेश इति ज्ञापयति तेन साकचि कक इति रूपन्नेति । न च त्यदादौ किम् शब्दस्य पाठाभावेन कथमादेश-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

इति वाच्यम्, त्यदादौ पाठकरणेनादोषात् । कृतिहोरित्यत्र उतिहोरिति न्यासेन कातीत्यत्र वातीति न्यासेन सर्वदोषपरिहार इति ६०

[अश्वचनम्] ननु इदमोऽन्वादेश इति सूत्रेऽनुदात्तमात्रविधानेन आभ्यामिति सिद्धेऽश्विधानं किमर्थमिति चेन्न; साकचि हलिलोप इत्यस्याप्राप्त्या तत्राभ्यामितिसिद्धयेऽश्विधानस्यावश्यकत्वात् ॥ ६१ ॥

राजन्शब्दाच्छसि भसंज्ञायामल्लोपो न इत्यल्लोपे स्तोःश्चुनाश्चुरिति श्चुत्वे राज्ञ इति । न चात्र पञ्चमीसमासपक्षेऽल्लोपस्य स्थानिवत्त्वात्कथं श्चुत्वमिति वाच्यम्, पूर्वत्रासिद्धे न स्थानिवदिति निषेधात् । न चान्तरङ्गे श्चुत्वे कर्त्तव्ये बहिरङ्गस्याल्लोपस्यासिद्धत्वात् कथं श्चुत्वमिति वाच्यम्; यथोद्देशपक्षे षाष्ठीं परिभाषां प्रति श्चुत्वस्यासिद्धतया परिभाषाया एवाप्राप्तेः । वाह ऊठित्यत्रोठ्ग्रहणेन ज्ञापितत्वादियं षाष्ठी ॥ ६२ ॥

वृत्रहन्—शब्दाच्छसि भसंज्ञायामल्लोपे च नकारे परे कुत्वविधानसामर्थ्यादल्लोपस्य स्थानिवत्त्वाभावाद्धो हन्तेरिति कुत्वे, योगविभागसामर्थ्यादनन्तरस्येति न्यायं बाधित्वाऽपूर्वस्येति सर्वसम्बन्धेनियमेन णत्वाप्राप्त्या वृत्रघ्न इति सिद्धम् । कुव्यवायेहादेशे णत्वप्रतिषेधो वक्तव्य इति वार्त्तिकभाष्यविरोधेन माधवोक्तं वैकल्पिकणत्वं नादरणीयमिति दिक् ॥ ६३ ॥

मघवन्शब्दात्सौ मघवा बहुलमिति त्रादेशे उगिदचामिति नुमि सुलोपे संयोगान्तलोपे प्रत्ययलक्षणेन सर्वनामस्थान इति दीर्घे मघवानिति; पक्षे मघवेति । अत्र दीर्घे कर्त्तव्ये संयोगान्तलोपस्यासिद्धत्वन्तु न शङ्क्यम्; श्वन्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्य; मघवा बहुलमिति सूत्रारम्भप्रत्याख्यानयोः फलैक्याय बहुलग्रहणेनासिद्धत्वाभावकल्पनात्, अतएव मघवानसौ मघवान्जीषीत्यादि प्रयोगाः सङ्गच्छन्ते ॥ ६४ ॥

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitized by eGangotri

कृतैकशेषाभ्यां शतसहस्रशब्दाभ्यां जश्शसोः श्यादेशे, नुमि, दीर्घे शतानीत्यादि; अत्र ष्णान्ता षडिति षट्संज्ञायां षड्भ्यो लुगिति लुक् तु नाशंक्यः सर्वनामस्थानसन्निपातेन जातस्य नुमः सन्निपातपरिभाषया तद्विघातकत्वात् ॥ ६५ ॥

[अष्टौ] अष्टन्—शब्दाज्जश्शसोः; अष्टनो दीर्घादिति सूत्रे दीर्घग्रहणेनात्वस्य वैकल्पिकत्वबोधनात् अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशेन जश्शसोर्विषयेऽप्यात्वज्ञापनादात्वे अष्टाभ्य औशिति औशादेशे वृद्धौ च सिद्धम् ॥ ६६ ॥

प्रिया अष्टौ येषां तानित्यर्थे समासाच्छसि भसंज्ञायामल्लोपे प्रियाष्ट्न इति । अत्र पञ्चमीसमासपक्षेऽल्लोपस्य स्थानिवत्त्वान्नष्टुत्वम् । पूर्वत्रासिद्धे न स्थानिवदिति निषेधस्तु न तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात् । पञ्चमीसमासस्यानित्यत्वपक्षे तु कार्यकालपक्षे त्रिपाद्यामप्यन्तरङ्गपरिभाषायाः प्राचीनमते प्रवृत्तिस्वीकारेण तयाऽसिद्धतया न ष्टुत्वमिति दिक् ॥ ६७ ॥

इत्यादिना इति मूले समाहितम्

[त्वं स्त्री] अत्र ङे प्रथमयोरिति सो रमादेशे त्वाहौ साविति त्वाहादेशे शेषे लोप इति टिलोपे परमपि अमिपूर्व इति पूर्वरूपं बाधित्वा अपरनिमित्तकत्वेनांतरङ्गत्वाट्टाप् कथं नेति चेन्न; अलिङ्गे युष्मदस्मदी इति वार्त्तिकेन लिङ्गाभावबोधनेन टापोऽप्राप्तेः । न च शीशिलुग्नुम् विधिभ्यो युष्मदस्मदादेशाः पूर्वविप्रतिषेधेनेति वार्त्तिकेन लिंगसत्ताबोधनादुक्तसमाधानं न युक्तिकरमिति वाच्यम्, शेषे लोप इत्यस्यावृत्त्या शेषे इत्यत्र स्थानिनाऽधिकरणत्वविवक्षया च मपर्यन्ताच्छेषस्य लोपो भवतीत्यर्थे अन्तरङ्गत्वादतो गुण इति पररूपेऽनेन चाद्शब्दस्य लोपेऽदन्तत्वाभावेन टापोऽप्राप्तेः ॥ ६८ ॥

[यूयम्] अत्र ङेप्रथमयोरिति जसोऽमादेशे यूयवयौ जसीति यूयवयादेशे शेषे लोप इत्यन्तलोपे स्थानिवत्त्वेनामो जसः शीति

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

श्यादेशः कुतो नेति चेन्न; अङ्गकार्ये कृते पुनर्नाङ्गकार्यमिति परिभाषया वारणासम्भवात् । न च द्वयोरित्यादिनिर्देशेन अस्या अनित्यत्वादसत्वाच्च श्यादेशो दुर्वार इति वाच्यम्; ङेप्रथमयो-रित्यत्र मकारान्तरं प्रश्लिष्याम् मान्त एवावशिष्यते न तु विक्रि-यत इति व्याख्यानेनादोषात् ॥ ६९ ॥

ननु ओकारभकारसकारादौ सुपि सर्वनाम्नष्टेः प्रागकच् अन्यत्र तु सुवन्तस्य च टेरिति वार्त्तिकेन युवामावामिति सिद्धयुत्तरमकचि युवकामावकामिति सिद्धौ मपर्यन्तस्येत्यधि-कारसूत्रं किमर्थमिति चेन्न, त्वया मयेत्यत्र त्व्याम्येत्यापत्तेः । न चाच्येरिति न्यासेनात्र न दोष इति वाच्यम् युवकाभ्यामावका-भ्यामित्यत्र दोषापत्तेः ॥ ७० ॥

[युष्माकम्] युष्मदस्मद्भ्यामामि साम आकमित्याकमादे-शेऽन्त्य-लोपे सवर्णदीर्घे च सिद्धम्। नन्वत्र सामः सर्वथाऽसम्भवेन ससुट्कनिर्देशः किमर्थं इति चेन्न; आम्येव साम्त्वमारोप्याकमादे-शेऽन्त्यलोपे च स्थानिवत्त्वेऽपि न सुटः प्राप्तिरित्याशयात् । अत एवोक्तं मूले भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देश इति ॥७१॥

[समस्यमाने] त्वमावेकवचने युवावौ द्विवचने इति सूत्रयो-रर्थपरत्वेन व्याख्यानस्य फलन्दर्शयति समस्यमाने इत्यादिना । तथा च त्वां मां वाऽतिक्रान्त इति विग्रहे परत्वात्पूर्वविप्रतिषेधाद्वा सुजस्ङेङस्सु त्वाहौ सावित्यादेः प्राप्तावपि, अन्यत्र त्वमावेवादेशौ भवतः एवं युवामावां वाऽतिक्रान्त इति विग्रहे सुजस्ङेङस्सु त्वाहौ सावित्यादेः प्राप्तावपि,अन्यत्र युवावावेवादेशौ स्तः।एवंयुष्मानस्मा-न्वाऽतिक्रान्त इति विग्रहे सुजस्ङेङस्सु त्वाहादेः प्राप्तावपि,अन्यत्र केप्यादेशा नेति सन्दर्भोक्तरीत्या स्वयमूहनीयमिति दिक् ॥७२॥

अमुमंचतीत्यर्थे क्विन्नन्तत्वात्प्रातिपदिकत्वेन सौ अनिदिता-मिति न लोपे,उगिदचामिति नुमि, सुलोपे संयोगान्तलोपे,क्विन्प्रत्य-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

यस्येति कुत्वे विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यय इत्यद्र्यादेशे यणि, अदसोऽद्रेः पृथङ् मुत्वं केचिदिच्छन्ति लत्ववदिति बलाददसोऽसेरित्युत्वमत्वे अमुमुयङ्, अन्त्यबाधे अन्त्यसदेशस्येतिबलात्परस्यैवमुत्वमिति मते अदमुयङ्, अः सेः सकारस्य स्थाने यस्येत्यर्थेऽत्र त्यदाद्यत्वाभावेन मुत्वन्नेति मते अदद्र्यङिति मूले स्पष्टम् ।।७३।।

[सेदुषः] सदेर्लिटि क्वसौ द्वित्वे एत्वाभ्यासलोपे च पदसंस्कारपक्षे प्रातिपदिकत्वेन शसि पूर्वोपस्थितनिमित्तकत्वेनान्तरङ्गत्वादिटि ततो वसोः संप्रसारणमिति संप्रसारणेऽपीटः श्रवणापत्तिरिति चेन्न, अकृतव्यूहा इति परिभाषया संप्रसारणेनेटो निमित्तस्य बलादित्वस्य विनाशसम्भावनायां पूर्वमेवेटोऽप्राप्तेरिति दिक् ।।७४।।

तत्पूर्वकाद् दृशेः त्यदादिष्विति क्विन्नन्तत्वात्प्रातिपदिकत्वेन सौ आसर्वनाम्न इत्यात्वे सोर्लोपे क्विन्प्रत्ययस्येत्यस्यासिद्धत्वाद्व्रश्चेति षत्वे जश्त्वेन डकारे, ततः कुत्वेन गकारे च तादृक् तादृगिति दीक्षिताशयः । क्विन्प्रत्ययस्येत्यत्र कुः क्विन्यत इति न्यासेन दृष्ट इत्यध्याहारेण च सिद्धे प्रत्ययग्रहणं वीप्सागर्भबहुव्रीहिलाभार्थन्तेन षत्वापवादत्वात्कुत्वेन खकारे चर्त्वे तादृक्, चर्त्वाभावपक्षे जश्त्वं प्रति कुत्वस्यासिद्धत्वात्खकार एव दिगादिभ्य इति निर्देशान्नासिद्धत्वमिति वा बोध्यमिति कैयटाद्याशयः ।।७५।।

[विमलदिवि] विमला द्यौर्यस्मिन्नहनीत्यर्थे समासादौ विभक्तौ नपुंसकाच्चेति श्यादेशेऽन्तर्वर्त्तिनीं विभक्तिं प्रत्ययलक्षणेनादाय राजपुरुष इत्यादौ पूर्वस्येवात्रोत्तरपदस्यापि पदसंज्ञायां दिव उदित्युत्वे प्राप्ते उत्तरपदत्वे चापदादिविधौ प्रतिषेधेनादोषात् ।

[अहः] ननु अहः अहोभ्यामित्यादौ रुत्वरत्वयोरसिद्धत्वान्नलोपः कथन्नेति चेन्न, रूपरात्रिरथन्तरेष्वह्नो रुत्वं वाच्यमिति वार्त्तिकारम्भसामर्थ्यादहन्नित्यावर्त्य एकेन नलोपाभावं निपात्य द्वितीयेन रुत्वविधानेनादोषात् ।।७७।।

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

दीर्घाणि अहानि यस्मिन्नित्यर्थे समासात्सौ हल्ङ्याबिति सुलोपे प्रत्ययलक्षणेनासुपीति निषेधाद्रोऽसुपीत्यस्याप्राप्त्याऽहन्निति रुत्वेऽपि तस्यासिद्धत्वात्सर्वनामस्थान इति दीर्घे दीर्घाहाः निदाघ इति सम्बुद्धौ तु दीर्घाप्राप्त्या उत्वे हे दीर्घाहो निदाघ! इति सिद्धम् ॥७८॥

[असृक्] सृजेः क्विना विधानेन क्विन्प्रत्ययस्येत्यत्र बहुव्रीहिबलादत्रापि कुत्वम् । न चैवं विश्वसृडादावपि कुत्वं स्यादिति वाच्यम्, सृजिदृशोरिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगेणाव्ययपूर्वपदे केवले च कुत्वकल्पनेनादोषात् । न चैवमुपयट्काम्यति उपसृट्काम्यतीति भाष्यप्रयोगासङ्गतिरिति वाच्यम्, व्रश्चादिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः स्रगृत्विक्शब्दयोस्तु निपातनादेव कुत्वम्, असृक्शब्दे तु अस्यतेरौणादिके ऋजिप्रत्यये चोः कुरिति कुत्वेन सिद्धिरिति कल्पनेनादोषात् ॥७९॥

शोभना आपो येषु इत्यर्थे समासाज्जश्शसोः श्यादेशे नित्यात्परादपि नुमः प्राक् प्रतिपदोक्तत्वादप्तृन्निति दीर्घे ततो नुमि स्वाम्पि । निरवकाशत्वं प्रतिपदोक्तत्वन्न तु तत्तच्छब्दानुवादेन विहितत्वमेवेति मते दीर्घस्याप इत्यत्र चारितार्थ्येन निरवकाशत्वाभावान्नुमेव स्वम्पीति ॥८०॥

ननु प्रत्ययः परश्चेत्यधिकारात्परशब्दयोगे अन्यारादिति पञ्चमी विधाने प्रातिपदिकविशेषणाद्येन विधिरिति तदन्तविधौ, अजाद्यन्तादन्ताच्च प्रातिपदिकाट्टाबित्यर्थः कुतो नेति चेन्न;पञ्चानामजानां समाहार इत्यर्थे तद्धितार्थेति समासे संख्यापूर्वो द्विगुरिति द्विगुसंज्ञायामकारान्तोत्तरपदो द्विगुःस्त्रियामिष्ट इति स्त्रीत्वे द्विगोरिति ङीपि पञ्चाजीत्यत्र टावापत्तेरतो लक्ष्यानुरोधात्षष्ठ्यन्ततया व्याख्यानान्न दोष इत्याशयेनाह-अजादिभिः स्त्रीत्वस्येत्यादि ॥८१॥

ननु समासप्रत्ययविधौ प्रतिषेध इति निषेधात्तदन्तविध्यभावे

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

शूद्ररूपात्प्रातिपदिकादित्यर्थे महाँश्चासौ शूद्रो महाशूद्रो महाशूद्रत्वजातिविशिष्टा स्त्री महाशूद्रीत्यत्र दोषाभावेन शूद्राचामहत्पूर्वाजातिरित्यत्रामहत्पूर्वाग्रहणं व्यर्थमेवेति चेन्न, स्त्रीप्रत्यये समासप्रत्ययविधावित्यस्याप्रवृत्तिज्ञापनेन चारितार्थ्यात् ॥८३॥

[पञ्च स्त्रियः] नन्वत्र कार्यकालपक्षे नान्तत्वाभावेन षट्संज्ञाया अप्राप्त्या कथं न षडिति निषेध इति चेन्न, षट्संज्ञां प्रतिनलोपः सुप्स्वरेति नलोपस्यासिद्धत्वेन भूतपूर्वषट्त्वाश्रयणेन वा निषेधसंभवात्।

ननु प्रत्ययस्थादिति सूत्रे पूर्वस्येत्यस्याभावेऽपि उभयनिर्देशे पञ्चमीनिर्देशो बलीयानिति बलात्, प्रत्ययस्थककारात्परस्येत्वमित्यर्थेऽपि सर्विकेत्यत्र न दोषः। अत्रैव तपरकरणेन, अत्ग्रहणेन न यासयोरिति निषेधसामर्थ्येन च पूर्वस्यापीत्त्वमिति; पूर्वस्य परस्य च प्राप्तौ पूर्वस्यैवेति च ज्ञापनादिति पूर्वग्रहणं व्यर्थमेवेति चेन्न; कटुकेत्यत्र दोषापत्तेरिति दिक् ॥८४॥

भस्त्रैषेति सूत्रे आतः स्थाने इत्यनुवृत्तस्य स्वशब्दस्यैव विशेषणत्वमिति संज्ञोपसर्जनाभ्यामन्यत्रात्मीयायामकचि आतःस्थानिकत्वाभावत्स्विका परमस्विकेत्यत्र प्रत्ययस्थादिति नित्यमेवेत्त्वम्; संज्ञोपसर्जनयोस्तु टापि अज्ञाते के, केण इति ह्रस्वे पुनष्टापि स्विका स्वका निःस्विकानिःस्वकेत्यत्रानेन विकल्पेनेत्त्वमिति दिक् ॥८५॥

अभाषितपुंस्काच्चेत्यत्र परपञ्चमीस्वीकारे न विद्यते खट्वा यस्या इत्यर्थे बहुव्रीहौ शेषाद्विभाषेत्यस्य वैकल्पिकत्वेन कपोऽभावे गोस्त्रियोरिति ह्रस्वे पुनष्टापि अज्ञाताऽखट्वेत्यर्थे के, केण इति ह्रस्वे पुनष्टापि अनेन विकल्पेनेत्वापत्तेः। अत एवोक्तं मूले बहुव्रीहेर्भाषितपुंस्कत्वादित्यादि। अत्रैव समासान्त् शेषाद्विभाषेति कपि गोस्त्रियोरिति ह्रस्वाभावे केण इति ह्रस्वे प्राप्ते न कपीति निषेधे आपोऽन्यतरस्यामिति वैकल्पिकह्रस्वेऽनेनेत्वविकल्पे, अखट्विका अखट्वका अखट्वाकेति दिक् ॥८६॥

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

ननु समासप्रत्ययविधाविति तदन्तविधिनिषेधे टिड्रूपं यत्प्रातिपदिकमित्यर्थेऽवयवेऽचरितार्था अनुबन्धाः समुदायस्योपकारका भवन्तीति बलात्कुरुचरीति सिद्धौ, अनुपसर्जनाधिकारः किमर्थः, बहुकुरुचरेत्यत्र तु न दोषः, यं समुदायं यो न व्यभिचरति स तस्योपकारको भवतीति स्वीकारादिति चेन्न, स्त्रीप्रत्यये समासप्रत्ययविधावित्यस्याप्रवृत्तिज्ञापनेन चारितार्थ्यादिति संक्षेपः ८७

वचेर्लृटः शानचि स्ये कुत्वषत्वे आनेमुगिति मुकि णत्वटापोर्वक्ष्यमाणेति, अत्र न ल्यपीति ज्ञापकेन इत्वघटितधर्मानयनेऽनल्विधावित्यस्याप्रवृत्तिज्ञापनेन लृटष्टित्त्वोगित्वे स्थानिवत्त्वेनादायङी प्तु नाशंक्यः, शासुटो ङित्त्वेन लाश्रयमनुबन्धकार्यन्नादेशानामितिज्ञापनात्। न च ङिच्च पिन्नेति भाष्यान्ङित्करणस्य चारितार्थ्येनज्ञापकत्वासम्भवादुक्तदोषो दुर्वार इति वाच्यम्, श्नःशानचः शित्वेन क्वचिदनुबन्धकार्येऽप्यनल्विधावित्यस्यप्रवृत्तिकल्पनेनादोषात्। अत्र शित्वस्यापिभाष्ये प्रत्याख्यानेतुसत्यभिधानेऽजादित्वाट्टाबितिदिक्

अन् इत्यनेनाणि प्रकृतिभावबाधनार्थं कृतेन कार्मस्ताच्छील्ये इति निपातेन, अणि सति यत्कार्यन्तत्ताच्छीलिकेणेऽपि भवतीति ज्ञापनेन, चुराशीलमस्या इत्यर्थे छत्रादिभ्यो ण इति णे आद्यचो वृद्धौ टिड्ढाणेति ङीपि चौरीति सिद्धम् ॥८६॥

क्रपेऽयञश्चेति संहितापाठेन अपत्यग्रहणं कर्त्तव्यमिति वार्त्तिकप्रत्याख्यानस्य फलैक्याय वार्त्तिकेऽपत्यपदमपत्याधिकारस्थपरमित्यनुमीयते तेन द्वीपे भवा द्वैप्येत्यत्रेव देवस्यापत्यं दैव्येत्यत्रापि यञश्चेति ङीप् न। देवाद्यञञाविति हि यञ प्राग्दीव्यतीयो न त्वपत्याधिकारपठित इति दिक् ॥९०॥

गर्गादियञन्ताद्गार्ग्यशब्दात् प्राचां ष्फस्तद्धित इति ष्फे षः प्रत्ययस्येतीत्संज्ञायां लोपे च आयनेयीति आयनादेशे षित्वसामर्थ्यात्ष्फेणोक्तेऽपि स्त्रीत्वे उक्तार्थानामप्रयोग इति न्यायं बाधि-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

त्वात्षिद्गौरेति ङीषि णत्वे गार्ग्यायणीति, पक्षे यञश्चेति ङीपि अकारलोपे हलस्तद्धितस्येति यलोपे गार्गीति ॥६१॥

प्राचां ष्फ इति सूत्रे तद्धितग्रहणेन क्वचिदन्यतोऽपि भवतीति-ज्ञापनेन आसुरेरुपसंख्यानमिति सिद्धम्; तेन ष्फे आयनादेशे षित्वसामर्थ्यात्षिद्गौरेति ङीषि आसुरायणीति सिद्धम् ॥६२॥

ममेयमित्यर्थे तस्येदमित्यणि तवकममकावेकवचने इति ममकादेशे आद्यचो वृद्धौ अणन्तत्वाट्टिढेति ङीपि सिद्धे, केवलमामकेतिसूत्रे मामकग्रहणं व्यर्थं सत्,अणन्तान्मामकशब्दाद्यदि ङीप् स्यात्तर्हि संज्ञाछन्दसोरेवेति नियम्यते तेन लोकेऽसंज्ञायां मामकेति मूले स्पष्टम् ॥६३॥

उदात्तग्रहणं वृषाकप्यर्थम् अन्यथा लघावन्ते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तपत्तेरिति भाष्येण कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्य इत्यनुमीयते ॥६४॥

ननु अनुपसर्जनादित्यस्य अन्यत्रेव वर्णादनुदात्तादित्यत्रापि गृह्यमाणविशेषणत्वं कुतो नेति चेन्न त्रीण्येतान्यस्या इत्यर्थे त्र्येणीति गृह्यसूत्रप्रयोगेणात्र तदन्तविशेषणत्वादिति दिक् ॥६५॥

दंशत्यनयेत्यर्थे दाम्नीशसेति ष्ट्रनि षत्वादिषु कृतेषु टापि दंष्ट्रेत्यत्र षिद्गौरेति ङीष् तु नाशंक्यः, गौरादिषु मातामहीशब्दपाठेनानित्यः षितां ङीषिति बोध्यते, अन्यथा मातरि षिच्चेति षित्वादेव सिद्धेः ॥६६॥

ननु जानपदेति सूत्रे अमत्रग्रहणेन कुण्डशब्दादमत्रे एव ङीष् नान्यत्रेति नियमेन, अमृते जारजः कुण्ड इति कुण्ड शब्दाज्जाति लक्षणङीष् कथमिति चेन्न; अमत्रेऽनुगतसंस्थानव्यंग्यरूपजातित्वाभावेनाप्राप्तौ नियमत्वासंभवात् । स्त्रीविषयत्वादिति मूलस्य जातित्वाभावादित्यर्थ इति दिक् ॥६७॥

ननु नागशब्दस्य जातिवाचकत्वेन जातेरिति ङीषिसिद्धेजान-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

पदेतिसूत्रे नागग्रहणं व्यर्थमिति चेन्न इयं स्त्री नागी हस्तिनी स्थौल्यगुणयोगादित्यत्र नागशब्दस्यैकव्यक्तिवृत्तित्वेन जातिवाचकत्वाभावेनासिद्धेः। न चात्र स्थूलग्रहणं व्यर्थमिति वाच्यम्; इयं स्त्री नागा सर्पिणी दैर्घ्यगुणयोगादित्यत्र दोषापत्तेः ॥९८॥

कर्तृकरणे कृता बहुलमिति सूत्रे बहुलग्रहणेन, अम्बाम्बेति सूत्रे गवादिग्रहणेन,क्रीतात्करणपूर्वादिति सूत्रे पूर्वग्रहणेन,च गतिकारकोपपदानां कृद्भिःसह समासवचनं प्राक् सुबुत्पत्तेरित्यस्यानित्यतयासुबन्तेन समासात्पूर्वमेव धनेनाक्रायीत्यर्थे टापिततःसुपिसमासेऽदन्तत्वाभावात्क्रीतात्करणपूर्वादित्यस्याप्राप्तिरिति दिक् ९९

आनुकि दीर्घोच्चारणेन क्वचिदन्यत्रापि भवतीति ज्ञापनाद्ब्रह्माणीति सिद्धमिति केचित्। परे तु अनुकरणे पररूपापत्तिः, अकारोच्चारणसामर्थ्यात्पररूपं नेति तु न युक्तम्, अल्लोपो न इति लोपापत्तेः तथा च ब्रह्माणमानयति जीवयतीत्यर्थेऽणन्तान्ङीबित्याहुरिति दिक् ॥१००॥

ननु कल्याणपाणिपादेत्यत्र ङीष्वारणाय स्वाङ्गादितिसूत्रेऽस्वाङ्गपूर्वपदादित्यस्य सम्बन्धो भाष्ये कृतः, ततश्च स्वाङ्गभिन्नपूर्वपदकस्यैव स्वाङ्गवाचकस्य ग्रहणात्, शिखेत्यत्रदोषाभावेनोपसर्जनाद्ग्रहणं व्यर्थमेवेति चेन्न,शोभना शिखा सुशिखेत्यत्रादोषायतस्यावश्यकत्वादिति दिक्॥१०१॥इति स्त्रीप्रत्ययान्तो भागः

ननु प्रादिकार्थमात्रे प्रथमासिद्धौ किमर्थं परिमाणग्रहणमितिचेन्न, नामार्थद्वयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्न इति व्युत्पत्तिबलेन द्रोणाभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति मूलोक्तार्थानुपपत्तेः। सति त्वस्मिन् प्रत्ययार्थे परिमाणे प्रकृत्यर्थो (द्रोणरूपः) अभेदेन संसर्गेण विशेषणम्; प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन सम्बन्धेन व्रीहौ विशेषणमिति दिक् ॥१॥

ननु प्रातिपदिकार्थे प्रथमासिद्धौ वचनग्रहणं व्यर्थमिति चेन्न

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

उक्तार्थानामप्रयोग इति निषेधादेक इत्यादौ प्रथमानापत्तेः । अन्या विभक्तिस्तु न सम्भवति अनन्वितार्थकविभक्तिकल्पनापेक्षया अनुवादकविभक्तेरेवन्याय्यत्वादिति दिक् ॥२॥

क्रियान्वयित्वं कारकत्वमिति स्वीकारे ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्र ब्राह्मणस्यापि कारकत्वं स्यात्; साक्षात्क्रियान्वयित्वन्तत्त्वमिति स्वीकारे मातुः स्मरतीत्यत्र मातुः कारकत्वं स्यात् अतः क्रियाजनकत्वेनान्वयित्वन्तत्त्वमिति बोध्यम् ॥३॥

[कर्तुरीप्सिततमं कर्मेति] कर्तृवृत्तिव्यापारवाचकधातुवाच्यमथ च व्यापारप्रयोज्यं यत्फलं तादृशफलवत्त्वप्रकारकेच्छानिरूपितविषयताश्रयः कारकं सत्कर्मसंज्ञं भवतीत्यर्थः ॥४॥

[कर्तुः किमिति] अयं भावः कारकाधिकारात्कारकवृत्तिव्यापारप्रयोज्येत्याद्यर्थेनैव सिद्धे कर्तृग्रहणं व्यर्थमिति, चेन्न, माषेषुप्रसक्तमश्वं माषनाशो माभूदित्यन्यत्र बध्नातीत्यर्थके माषेष्वश्वं बध्नातीत्यत्र अश्ववृत्तिव्यापारप्रयोज्यगलबन्धसंयोगाश्रयत्वेन माषाणां कर्मत्वापत्तेः, कृते तु तस्मिन् कर्तृग्रहणसामर्थ्यात् प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयस्यैव कर्तुर्ग्रहणेनादोषात् । अत एवोक्तं मूले कर्मण ईप्सिता माषा नतु कर्तुरिति दिक् ॥५॥

[तमप्ग्रहणं किमिति] अयं भावः कर्तुरुद्देश्यं कर्मेत्येव सिद्धे ईप्सिततमग्रहणं व्यर्थमिति चेन्न यदा कृतभोजनोऽपि पयोलोभेन पुनरोदन-भोजने प्रवर्तते तदा पयसा ओदनं भुंक्ते इत्यत्र पयसः कर्मत्वापत्तेः । नन्वेवमपि ईप्सितमित्येव सिद्धे तमप्ग्रहणं व्यर्थमिति चेन्न अग्नेर्माणवकं वारयतीत्यत्र वारिधातुवाच्यसंयोगरूपफलाश्रयत्वेन अग्नेरपि कर्मत्वापत्तौ वारणार्थानामीप्सित इत्यस्यानवकाशतया माणवकादपि पंचम्यापत्तेः कृते तु तस्मिन् ईप्सिततमेऽस्य प्राप्तिरिति दिक् ॥६॥

[अर्थनिबन्धनेयं संज्ञेति] अहमपीदमचोद्यं चोद्ये इति

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

कैयटप्रयोगेण मारीचमुच्चैर्वचनं महार्थमिति भट्टिप्रयोगेण च अर्थनिबन्धनेयं संज्ञेति ज्ञायते, तेन बलिं भिक्षते वसुधामित्यादिसिद्धिरिति प्राचीनाः। नव्यास्तु परिगणितातिरिक्तानां येषां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थकत्वेन कर्त्तुरित्येव कर्मत्वम्, अत एव दुहियाचिरुधिप्रच्छिभिक्षिचिञामिति भाष्योक्तपरिगणनेभिक्षि-ग्रहणं सार्थकमिति दिक् ॥७॥

ननु शत्रूनगमयत्स्वर्गमित्यादौ कर्त्तुरित्येव सिद्धे गतिबुद्धीति सूत्रं व्यर्थमिति चेन्न णिजर्थव्यापारप्रयोज्य-फलाश्रयाणां यदि कर्मत्वं स्यात् तर्हि गत्याद्यर्थकानामेवेति नियमार्थत्वात्, तेन देवदत्तः पचति तं यज्ञदत्तः प्रेरयतीत्यर्थे पाचयत्योदनं देवदत्तेन यज्ञदत्त इत्यत्र देवदत्तस्य कर्मत्वं नेति संक्षेपः ॥८॥

ननु दर्शयति हरिं भक्तानित्यत्र बुद्ध्यर्थत्वादेव सिद्धे दृशेश्चेति वार्तिकं व्यर्थमिति चेन्न, गतिबुद्धीतिसूत्रे ज्ञानसामान्यार्थानामेव ग्रहणन्न तु तद्विशेषार्थानामिति ज्ञापनार्थत्वात् तेन स्मारयति घ्रापयति देवदत्तेनेत्यत्र कर्मत्वन्नेति दिक् ॥९॥

[येषां देशेति] अयं भावः "धातोरर्थान्तरेवृत्तेर्द्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति" वलात् अविवक्षितकर्मत्वेनअकर्मकत्वात् पाचयति देवदत्तेनेत्यत्र कर्मत्वं कुतो नेति चेन्न, अकर्मकग्रहणसामर्थ्यात् "येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः, नत्वविवक्षितकर्माणोऽपि" इत्यर्थबोधनेनादोषात् तेन मासमासयति देवदत्तमित्यत्र भवति; प्रकृतेनेति दिक् ॥१०॥

[पापेऽभिनिवेश इति] एष्वर्थेष्वभिनिविष्टानामिति भाष्यप्रयोगेण अभिनिविशश्चेति सूत्रे परिक्रयणे सम्प्रदानमन्यतरस्यामिति सूत्रान्मण्डूकप्लुतिन्यायेनान्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्चाश्रित्य क्वचिदप्रवृत्त्या प्रकृते नेति प्राचीनाः। नव्यास्तु उक्तभाष्यप्रयोगेण प्रकृतसूत्रे अविकृतस्यैव विशेर्ग्रहणेन

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

उक्तप्रयोगेऽप्राप्त्या उक्तक्लेशो निरर्थक इत्याहुः ॥११॥

[सर्पिषोऽपि स्यात्] अप्रयुज्यमानपदस्यार्थःपदार्थः इत्यपिश-ब्दस्य बिन्दुद्योतकत्वेन पदार्थद्योतकत्वादपिः पदार्थसम्भावनेत्या-दिना कर्मप्रवचनीयत्वेन स्यादित्यत्र षत्वाभावः । अत्र आशं-कायां लिङ्, आशंका उत्प्रेक्षा संभावना, तथा च सर्पिरवयव-बिन्दु कर्तृकदौर्लभ्यप्रयुक्तदौर्लभ्यवती संभावनाविषयासत्तेति वाक्यार्थः। अत्र स्वकर्तृकदौर्लभ्यप्रयुक्तदौर्लभ्यवत्त्वसम्बन्धोऽप्य-पिद्योत्यः । सर्पिष इत्यत्र बिन्दोरवयवावयविभावसम्बन्धे षष्ठी, द्वितीया तु न कर्मप्रवचनीयद्योत्यसंबंध-प्रतियोगिवाचकादेव तद्वि-विधानेन तदप्राप्तेः अन्यत्सर्वं मूले सुगममिति दिक् ॥१२॥

[गंगायां घोष इति] अयं भावः करणमिति महासंज्ञया साधके लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति तमप्ग्रहणं व्यर्थ-मिति चेन्न, अस्मिन् कारकाधिकारे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयत इति ज्ञापनार्थत्वात् तेन गङ्गायां घोष इति गौणाधारेऽपि सप्तमी सिद्धा। अन्यथा अधिकरणमिति महासंज्ञया आधारे लब्धे आधारग्रहणात् सर्वावयवव्याप्त्या य आधारस्तस्यैव ग्रहणापत्तौ तिलेषु तैलं दध्नि सर्पिरित्यादावेव स्यान्न तु प्रकृते, इति दिक् ॥१३॥

ननु हेतुकरणयोः पर्यायतया करणत्वादेव सिद्धे हेताविति-सूत्रं व्यर्थमिति चेन्न, द्रव्यगुणक्रियाद्यन्यतमत्वे सति व्यापार-शून्यत्वं हेतुत्वं, द्रव्यगुणक्रियाद्यन्यतमत्त्वे सति नियतव्यापार-वत्त्वं करणत्वमिति तयोर्वैलक्षण्येनादोषादिति ॥१४॥

[अन्यकर्तृक इति] ननु हरिर्भक्तिमभिलष्यतीत्यत्र रुच्य-र्थत्वात्संप्रदानत्वं कुतो नेति चेन्न, अभिलष्यतिकर्त्रपेक्षया यद-न्यदभिलष्यति कर्म तत्कर्तृकस्यैव रुच्यर्थकस्य ग्रहणेनादोषात् अत एवोक्तं मूले हरिनिष्ठप्रीतेर्भक्तिः कर्त्रीति दिक् ॥१५॥

[कृति किम्] अयं भावः कर्तृकर्मभ्यां क्रियाया आक्षेपात् क्रिया-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

वाची च धातुरेव धातोश्च तिङ्कृतोर्विधानेपि तिङ्योगे, नलो-केतिनिषेधात्कृद्योग एवभविष्यतीति व्यर्थं कृद्ग्रहणम् कृदन्त-मात्रनिष्ठशक्तिग्रहप्रयोज्योपस्थितिविषयीभूतक्रियानिरूपितकर्तृकर्मणोर्यथा स्यात्, तद्धितान्तनिष्ठशक्तिग्रहप्रयोज्योपस्थितिविषयी-भूतक्रियानिरूपितकर्तृकर्मणोर्मा भूदिति ज्ञापयति, तेन कृतपूर्वी कटमित्यत्र न। अत्र कर्मणोऽविवक्षया भावेक्ते कृतं पूर्वमनेनेति विग्रहे सुप्सुपेति समासे पूर्वाच्चेति इनिः पुनः कर्मयोगविवक्षायां कृतपूर्वी कटमिति बोध्यम् ॥१६॥

पूर्वं भूत इति लौकिकविग्रहे पूर्व अम् भूत सु इत्यलौकिक-विग्रहे सुप्सुपेति समासे प्रातिपदिकत्वात्सुपो लुकि शास्त्रीयोपसर्जन-त्वसमानाधिकरणलौकिकोपसर्जनत्वस्य पूर्वपदार्थे सत्त्वेन तस्यैव पूर्वप्रयोगे प्राप्ते भूत पूर्वे चरडिति निर्देशेन भूतशब्दस्यैव पूर्वप्रयोगे एकदेशविकृतन्यायेन पुनः सुबुत्पत्तौ भूतपूर्व इति सिद्धम् ॥१७॥

हरौ इतीति लौकिकविग्रहे हरि ङि अधीत्यलौकिकविग्रहे अव्ययमित्यादिना विभक्त्यर्थेऽव्ययीभावसमासेन प्रातिपदिक-त्वात्सुपो लुकि प्रथमानिर्दिष्टमित्युपसर्जनत्वेन उपसर्जनं पूर्वमित्य-धेः पूर्वप्रयोगे एकदेशविकृतन्यायेन पुनः सुपि अव्ययीभावश्चेत्य-व्ययत्वेन अव्ययादाप्सुप इति लुकि अधिहरीति सिद्धम्। अत्र निपातेनाधिकरणार्थस्योक्तत्वात्कथं सप्तमीत्याशंक्य विभक्ति-ग्रहणसामर्थ्यात्सप्तमीति समाहितं मूले ॥१८॥

दिशयोर्मध्यमिति लौकिकविग्रहे दिशा ओस् अपेत्यलौकिकवि-ग्रहे अव्ययमिति योगविभागात्समासेन प्रातिपदिकत्वात्सुपो लुकि प्रथमा निर्दिष्टमित्युपसर्जनत्वेन उपसर्जनं पूर्वमिति पूर्व प्रयोगे एक-विभक्तिचापूर्वनिपात इत्युपसर्जनत्वेनगोस्त्रियोरिति ह्रस्वे पुनःसुपि अव्ययीभावश्चेत्यव्ययत्वेन, अव्ययादिति लुकि प्राप्ते नाव्ययो-भावादित्यादिना निषेधे अमादेशे च अपदिशमिति सिद्धम्। क्लीबा-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

व्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियामित्यमरस्वारस्येन भागुरिमतसिद्धटापो वैकल्पिकत्वेन च न ह्रस्वप्रयोजनमिति दिक्॥१९॥

अर्थमर्थम्प्रतीति विग्रहे अव्ययमित्यादिना वीप्सार्थे समासेन प्रातिपदिकत्वात्सुपो लुकि उपसर्जनत्वेन पूर्वप्रयोगे पुनः सुपि अव्ययीभावश्चेत्यव्ययत्वेन अव्ययादिति लुकि प्राप्ते नाव्ययीभावादितिनिषेधेऽमादेशे च प्रत्यर्थमिति सिद्धम् । नन्वस्य नित्यसमासत्वेन विग्रहोऽनुचित इति चेन्न, प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात् द्वितीयागर्भकवाक्यमपि भवतीति कल्पनेनादोषादिति प्राचीनाशयः ॥२०॥

नन्वेकार्थीभावविवक्षायां समासस्य व्यपेक्षाविवक्षायां वाक्यस्य च सिद्धौ विभाषाधिकारः किमर्थं इति चेन्न, लक्षणैकचक्षुष्काणां वैयाकरणानां क्व एकार्थीभावो नित्यः क्व वैकल्पिक इति ज्ञानस्याशक्यतया तदर्थमधिकारस्यावश्यकत्वात् । अत्र विभाषाधिकारकरणेन प्राचीनानां नित्यसमासत्वं बोध्यते । न चैवं सहसुपेत्यस्यापि नित्यत्वापत्तौ विस्पष्टं पटुर्विस्पष्टपटुरिति भाष्योक्तविग्रहासंगतिरितिवाच्यम्; अव्ययं विभक्तीत्यादिनाऽव्ययीभावसंज्ञाविधानेनैव सिद्धे समाससंज्ञाविधान–सामर्थ्येन सहसुपेत्यस्य वैकल्पिकत्वज्ञापनादिति दिक् ॥२१॥

[पञ्चगवधनः] पंच गावो धनं यस्येत्यर्थे त्रिपदे बहुव्रीहौ द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनमिति बलाचाद्धितार्थोत्तरेति नित्यसमासे, प्रातिपदिकत्वेन सुपो लुकि, गोरतद्धितलुकीति टचि, अवादेशे पुनः स्वादिकार्ये, सिद्धम् ॥२२॥

[द्व्यन्हा]द्वयोरन्होर्भवेत्यर्थे तद्धितार्थेतिसमासेन प्रातिपदिकत्वात्सुपो लुकि,राजाहः सखिभ्यश्चेति टचि, अह्नोह्न एतेभ्यइत्यह्नादेशे, टापि, उक्तं रूपं सिद्धम् । टचष्टित्वेन टिड्ढेति ङीप् तु नाशंक्यः, तद्धितार्थं प्रत्युपसर्जत्वात् । न चात्र कालाट्ठञिति विहितस्य ठञः

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

द्विगोर्लुगनपत्येइति लुक्यपि प्रत्ययलक्षणेनादाय टिड्ढेत्यनेन ङीप् कथन्नेति वाच्यम्, ठञो योऽकारस्तदन्तादिति भाष्यसम्मतेर्थे वर्णाश्रयत्वेन वर्णाश्रये नास्ति प्रत्ययलक्षणमिति निषेधात् । द्विगोरिति ङीप् तु अपरिमाणविस्ताचितेति निषेधादेव नेति दिक् ॥२३॥

[व्याघ्रीति] व्याजिघ्रतीत्यर्थे सुपीति योगविभागात्के आतो लोपे गतिकारकोपपदानां कृद्भिरित्यादिबलात्सुबुत्पत्तेः पूर्वमेव समासे जातित्वात् ङीषि सिद्धम् । सुबुत्पत्त्यनन्तरं समासे तु स्वार्थद्रव्यलिङ्गसंख्याकारकाणां क्रमेणोपस्थितिरिति बलात्पूर्वमेव टापि, ततः समासे उक्तरूपासिद्धेः ॥२४॥

चित्रा जरती गौर्यस्येत्यर्थेऽनेकमन्यपदार्थे इति समासेन विभक्तेर्लुकि सप्तमी विशेषणे बहुव्रीहाविति बलाद्विशेषणयोः पर्यायेण पूर्वप्रयोगे गोस्त्रियोरिति ह्रस्वे चित्राजरतीगुः जरतीचित्रागुर्वेति सिद्धम् । अत्र स्त्रियाः पुंवदिति पुंवद्भावस्तु नाशंक्यः, पूर्वपदस्य मध्यमेन व्यवधानात्, मध्यमस्य च पूर्वपदत्वाभावात्, उत्तरपदशब्दस्य समासचरमावयवे, पूर्वपदशब्दस्य च समासप्रथमावयवे रूढत्वादिति केचित्; वस्तुतस्तु आनङ् ऋतो द्वन्द्वे इत्यत्रेवात्रापि उत्तरपदेन पूर्वपदाक्षेपाभावात् मध्यमपदस्य पुंवत्त्वं, स्यादेव, अतएव कर्मधारयोत्तरपदक बहुव्रीहौ चित्राजरद्गवीकः कर्मधारयपूर्वपदकबहुव्रीहौ जरच्चित्रगुरिति भाष्योक्तं संगच्छते ॥२५॥

ननु वैयाकरणी भार्या यस्येत्यर्थे बहुव्रीहौ सुपो लुकि पुंवत्त्वं दुर्लभम्, अणो वृद्धेः स्वरूपसन्निमित्ततया वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे इति निषेधादिति चेन्न, प्रवाहणस्य ढे इति सूत्रस्थभाष्यप्रामाण्येन, अत्र निमित्तग्रहणेन च फलोपहितनिमित्तस्यैवात्रग्रहणमिति बोधनेनादोषादिति दिक् ॥२६॥

[पाणिपादम्] ननु उद्भूतावयवभेदविवक्षायामितरेतरयोगद्वन्द्वेन द्विवचनादेः, अनुद्भूतावयवभेदविवक्षायां समाहारद्वन्द्वे-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

नैकवचनस्य च सिद्धौ द्वन्द्वश्च पाणीत्याद्येकवद्भावविधायप्रकरणं व्यर्थमिति चेन्न, एषां समाहार एवेति नियमबोधधेन चारितार्थ्यात् । एषामेव समाहार इति विपरीतनियमस्तु न, तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणात् ॥२७॥

[नन्दकपाञ्चजन्यौ] अयं भावः विप्रतिषिद्धं चानधिकरणवाचीति सूत्रे विप्रतिषिद्धग्रहणाभावे, अद्रव्यवाचिनामेवोभयत्र द्वन्द्व इतिनियमे नन्दकपांचजन्ययोरद्रव्यवाचित्वाभावेनोभयद्वन्द्वानापत्तौ समाहारे नन्दकपांजन्यमिति न स्यात्, तदुक्तौ तु एतयोर्विरुद्धार्थकत्वाभावेन नियमाप्राप्त्या उभयद्वन्द्वसिद्धिरिति दिक् ॥२८॥

[तस्येदमित्यपत्येऽपीति] अयं भावः तस्यापत्यमत इञित्येक एवयोगोऽदन्तेभ्य इञर्थमस्तु औपगवादौइदन्त्वेनापत्यरूपार्थस्यापि बोधात्तस्येदमित्यनेनैव सिद्धेः,न चात्रशेषाधिकारादपत्यातिरिक्तस्यैवग्रहणमिति वाच्यम्,अन्यशब्दसम्बद्धापत्यरूपार्थस्योक्तत्वेऽपि उपगुसम्बद्धापत्यार्थस्यानुक्तत्वेनादोषादिति चेत्सत्यम् ॥ भानोरपत्यं भानव इत्यादौ वृद्धाच्छबाधनार्थं योगाविभाग इति दिक् ॥२९॥

[गोत्रे स्वैकोनसंख्यानामिति] ननु उक्तार्थानामप्रयोग इति न्यायेन प्रातिपदिकाधिकारेण च एकस्मिन् गोत्रार्थे अनेकप्रत्ययाप्राप्तौ एको गोत्रइति सूत्रं व्यर्थमिति चेन्न, पितुरेवापत्यं गोत्रमिति मते मूलाच्छततमे गोत्रे फगिञोः परस्परायामेकोनशतानिष्टप्रत्ययोत्पत्तौ अनिष्टापत्तेः, पितामहादीनामप्यपत्यंगोत्रमिति मते मूलाच्छततमे गोत्रे अष्टनवतिप्रत्यायानामुत्पत्तावनिष्टापत्तेस्तदेवोक्तं मूले गोत्रे स्वैकोनेत्यादिनेति दिक् ॥३०॥

[वामदेव्यम्] ननु ययतोर्विधानेऽपि यस्येति लोपेनैव सिद्धे वामदेवाड्ड्यड्ड्याविति सूत्रे डित्करणं व्यर्थमिति चेन्न, निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम्, एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ग्रहणमिति परिभाषाद्वयज्ञापनेन चारितार्थ्यात्, तेन अवा-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

मदेन्यमित्यत्र ययतोश्चातदर्थे इति स्वरो नेति दिक् ॥२१॥

द्वितीयखंडस्य विवृतिः समाप्ता ।

[भवितेति] पुगन्तलघूपधस्येति सूत्रे सार्वधातुकार्धधातुकयो-रित्यस्य अङ्गविशेषणत्वे सार्वधातुकार्धधातुकाव्यवहितपूर्वं यदङ्गं तदवयवस्येको गुणइत्यर्थे भिनत्तीत्यादावपिगुणःस्यात् । इको विशे-षणत्वे सार्वधातुकार्धधातुकाव्यवहितपूर्वस्य अंगावयवस्येको गुण इत्यर्थे भेत्तेत्यत्रापि गुणो न स्यादित्याशंक्य सूत्रारम्भसामर्थ्येन येन नाव्यवधानं तेन व्यवहितेऽपि भवतीति न्यायज्ञापनेन अनेक-वर्णव्यवधाने भिनत्तीत्यत्र गुणाभावेऽपि भेत्तेत्यत्र गुणवत् भवित् आ इति स्थिते गुणस्तु न, दीधीवेवीटामिति निषेधात् ॥१॥

[भवतादिति] ननु तातङो ङित्त्वेन ङिच्चेत्यन्त्यस्य स्थाने कुतो नेति चेन्न,अनन्यफलकङित्त्ववति आनङादौ चरितार्थस्य गुण-वृद्धिप्रतिषेधसम्प्रसारणादिफलकङित्त्ववति तातङि मन्थरं प्रवृत्तस्य ङिच्चेत्यस्य परत्वादनेकाल्शित्सर्वस्येत्यनेन बाधात् । अत्र तु उत्स-र्गापवादयोः अनेकाल्शित्सर्वस्य ङिच्चेत्यनयोः समबलत्वात् । (अत्रत्यान्योन्याश्रयविचारो बहुकालसाध्य) इति दिक् ॥२॥

[भवेदिति] ननु लिङो ङित्वस्य न ल्यपीति ज्ञापकेन अनुबन्धघटितधर्मानयने अनल्विधावित्यस्याप्रवृत्तिज्ञापनात् स्थानिवत्त्वेन आदेशे आनयनात् अवयवेऽचारितार्थ्यस्यानुब-न्धस्य समुदायोपकारकत्वमिति न्यायेन स्तुयादित्यादौ ङित्व-प्रयुक्ते कार्ये सिद्धे यासुटो ङित्त्वविधानं व्यर्थमिति चेन्न, क्वचि-दनुबन्धकार्येप्यनल्विधाविति प्रवर्त्तते इति ज्ञापनेन चारितार्थ्यात् । न च ङिच्च पिन्न पिंध ङिन्नेति भाष्येण ङित्वविधानस्यावश्यकतया ज्ञापकत्वासम्भवेनोक्तज्ञापने ज्ञापकासंभव इति वाच्यम्, श्नः शानचः शित्वस्य ज्ञापकत्वसम्भवादिति संक्षेपः ॥३॥

[सुटा यासुडिति] ननु विशेषविहितेन सुटा सामान्य-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

विहितस्य यासुटः तक्रकौंडिन्यन्यायेन बाधे कथं यासुडिति चेन्न, यासुट् परस्मैपदेष्वित्यत्र विषयसप्तम्या लिङः परस्मैपदविषयतायामेव यासुटो विधानेन तकारथकारयोश्च सुटो विधानेन कालभेदान्न बाध इत्यदोषात्, विषयभेदेऽपि अचिरादेशेन नुटो बाध इति भाष्यादेवं व्याख्यातमिति दिक् ॥४॥

अतो येय इति सूत्रे सार्वधातुकानुवृत्तौ चिकीर्ष्यादित्यत्र मध्येऽपवादाः पूर्वान्विधीन्बाधन्ते नोत्तरानिति न्यायेन अतो लोपं बाधित्वा अनेनेयादेशे भवेदित्यत्र अतो दीर्घो यञीति परत्वाद्दीर्घापत्तेरेतदर्थं तदनुवृत्तिरित्याशयः ॥५॥

[भवेयुः] अत्र भव यास् उसिति स्थिते लिङः सलोपोऽनन्त्यस्येति सलोपे उस्यपदान्तादिति पररूपं बाधित्वा परत्वान्नित्यत्वाच्चातो येय इति प्राचीनाः । नवीनास्तु यद्यपि संज्ञानिमित्तकत्वेन इयादेशस्य बहिरङ्गत्वेन अन्तरंगत्वात्पररूपं न्याय्यम्, तथापि यास इयित्यर्थस्य स्वीकारेण अपवादत्वात्सलोपं बाधित्वा इयादेशः । एवं चेयादेशप्राप्तिकाले पररूपस्य प्राप्तिरेव नास्ति; अतो येय इत्यत्र तु सन्धिरार्ष इत्याहुः ॥६॥

एधतेर्लिटि इजादेश्च गुरुमतोऽनृच्छ इत्यामि आम इति लिटो लुकि आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति सूत्रे कृञो ग्रहणेनानुप्रयोगोऽन्यस्यापीति ज्ञापनात्, कृभ्वस्तियोग इति सूत्रे कृशब्दमारभ्य कृञो द्वितीयेति ञकारेण कृञ्प्रत्याहाराश्रयणात्, कृञ्चानुप्रयुज्यते लिटीत्यनेन कृभ्वसामनुप्रयोग इति लिट्परककृशब्दानुप्रयोगे लिटस्तादेशे, लिटस्तझयोरेशिरेजिति एशादेशे, द्वित्वेऽभ्याससंज्ञायां, उरदित्यत्वे रपरत्वे, हलादिः शेषे कुहोश्चुरिति चुत्वे, यणि अनुस्वारपरसवर्णे एधाञ्चक्रे इति । अत्राम्प्रकृतीनां विशेषवाचित्वेन कृञः सामान्यक्रियावाचित्वेन तदर्थयोरभेदान्वयात् एकत्वावच्छिन्नदेवदत्ताभिन्नकर्तृकभूतानद्यतनपरोक्षकालि-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

कर्तृद्वयभिन्ना क्रियेति शाब्दबोधः ॥७॥

देहलीदीपन्यायेन उपदेश इत्यस्य एकाचि अनुदात्ते चान्वयः, अन्यथा विभित्सतीत्यत्रद्वित्वोत्तरमनेकाच्त्वान्निषेधो न स्यात्;कर्तुं हर्तुमित्यत्रतुमुनिञ्नित्यादिर्नित्यमित्याद्युदात्तत्वान्निषेधोनस्यादिति।

अत्र सूत्रएकाच्ग्रहणसत्वेऽसत्त्वे च जंघनितेतियङ्लुगन्तेनिषेधस्यदुर्वारतयाएकाज्ग्रहणंव्यर्थं सत्श्तिपाशपेतिपरिभाषांज्ञापयति तेनयङ्लुकि निषेधाप्रवृत्त्यर्थमेकाज्ग्रहणं स्वांशे चरितार्थमितिदिक् ९

अत्रैवसूत्रे अच इत्येकत्वविवक्षयामत्वर्थलक्षणया च एकाच्वत इत्यर्थेनैव सिद्धे एकग्रहणं व्यर्थं सत्, उपदेशत्वावच्छेदेन एकाचो ग्रहणमिति ज्ञापयति तेन अवधीदित्यत्र हन्रूपे उपदेशे एकाच्त्वेपि बधादेशरूपे उपदेशेऽनेकाच्त्वान्निषेधो नेति प्राचीनाशयः।नवीनास्तु सूत्रेलिङ्गवचनमतंत्रमितिपरिभाषाबलादुक्तार्थालाभेनअवधीदित्यत्र साक्षादुपदेशग्रहणेनसिद्धेस्थान्युपदेशग्रहणेमानाभावादित्याहुः१०

[ऊखतुः] अत्र सवर्णदीर्घोत्तरं पूर्वान्तवद्भावेनाभ्यासत्वाद्ध्रस्वः कुतो नेत्याशंक्य पर्जन्यवल्लक्षणप्रवृत्तिरिति बलात् अङ्गावयवाभ्यासस्याचो ह्रस्वस्यापि वार्णादङ्गं बलीय इति परिभाषाबलात्सवर्णदीर्घात्पूर्वमेव ह्रस्वे ततो दीर्घे लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायान्नेति समाहितम् ॥११॥

[क्रादीनां चतुर्णामिति] अयं भावः कृसृभृ एषां प्रकृत्याश्रयएकाजित्यनेन वृङ्वृञोः, प्रत्ययाश्रयश्र्युकः कितीत्यनेन च निषेधे सिद्धेऽत्र सूत्रे ग्रहणं किमर्थमिति चेन्न, प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिण्निषेधः स लिटि चेद्भवति तर्हि क्रादिभ्य एव नान्येभ्य इति नियमार्थत्वात् । नन्वेवमपि स्तुद्रुस्रादिचतुर्णां ग्रहणं व्यर्थमेवेति चेन्न, उक्तनियमेन वमादिषु प्रापितस्य, भारद्वाजनियमेन थलि विकल्पप्रापितस्यचेटोनिषेधार्थमावश्यकत्वादितिसंक्षेपः

[संज्ञायाः कार्यकालत्वादिति] प्राचीनमते संज्ञाशास्त्रस्य

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

कार्यकालपक्षेविधिवाक्येन सहैकवाक्यतयाबोधस्तथाचसन्वल्लघु-नीत्यादिशास्त्रस्य अङ्गसंज्ञकाभिन्नैकाच्कर्मकद्विरुच्चारणे पूर्वोऽ-भ्याससंज्ञकस्तस्य च सन्वद्भावदीर्घावित्यर्थे एकाक्ष्वेव प्रवृत्तिस्तेन और्णुनवत् आर्तथपत् अचचकासदित्यादिसिद्धिरिति माधवमतम् । इदश्च मतमजजागरादित्यत्र सन्वद्भावमाशंक्य लघुपरकाभ्यासस्य ग्रहणमिति समाधानपरकभाष्यविरुद्धमत एव वस्तुतोगस्यावयवो योऽभ्यास इति वर्णनादित्युक्तम् तेन और्णूनवत् आर्तीथपत् अची-चकासत् मतभेदे अचचकासदिति सिद्धम्,अन्यत्सर्वं सुगममितिदिक

[फले तु न भेद इति] न च गा आतामिति स्थिते वार्णा-दाङ्गं बलीय इति परिभाषया सवर्णदीर्घात्पूर्वमेव आतो ङित इती-यादेशे फले विशेषः स्पष्टः; किंच गा अ आन इति स्थितेवार्णादाङ्ग-मिति परिभाषया पूर्वमेव आनेमुगिति मुकि फलेविशेष इतिवाच्यम् । स्योन इति भाष्यप्रयोगेण वार्णपरिभाषाया अनित्यत्वात्, वार्ण-शास्त्रीयस्थानितासमानाधिकरणस्थानिताकत्वरूपसमानकार्यित्वे एव तस्याः प्रवृत्तिस्वीकारेण च अत्र तथात्वाभावेनादोषात्॥१४॥

[प्रणिमयते] न नु आर्धधातुके एवात्वविधानेन मारूपत्वा-संभवात्कथमत्र णत्वम् । न च प्रणिमातेत्यत्रापि मारूपस्य लाक्ष-णिकत्वेन कथं णत्वमिति वाच्यम् । गामादा ग्रहणेष्वविशेष इति परिभाषाबलात् लाक्षणिकस्यापि ग्रहणसंभवात् इति चेन्न, भाष्ये घुप्रकृतिमाङ्ङिति पाठेन ङितो माप्रकृतेर्मङोऽपि ग्रहणेन णत्वसंभवात्

[ख्याप्रकथने] भाष्येख्याञादेशस्यखशादित्वप्रयोजनप्रस्तावे सस्थानत्वं नमः ख्यात्रे इत्युक्तम्,तस्यायं भावः"शस्य यो वेतिवि-हितयकारस्य शर्परे विसर्जनीय इति दृष्ट्याऽसिद्धत्वेन विसर्जनीयः स्यादतो नमः ख्यात्रे इत्यत्र सस्थानत्वं जिह्वामूलीयो)वक्तव्य''इति। यद्ययं धातुरार्धधातुकेऽपि प्रयुज्यते तर्हि तृजन्तेऽस्मिन् शर्परे विसर्ज-नीय इत्यस्यामाप्तयाकुप्वोरिति जिह्वामूलीयेसिद्धे वार्तिकस्यवैयर्थ्यं

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

स्यादतोऽनुमीयते सार्वधातुके एवायं प्रयुज्यत इति दिक् ॥१६॥

इति तृतीयखण्डम्।

[औननत्] ननु ऊनधातोर्णिचि अन्तरङ्गत्वादतो लोपे धातुत्वाल्लुङि तिपि आडागमे च्लौ चङादेशे निशब्दस्य द्वित्वेऽभ्यासेऽकारश्रवणं कथमिति चेन्न, यियविषति पिपविषतीत्येतदर्थं पययोरिति वक्तव्ये ओः पुयण्ज्यपर इति सूत्रे वर्गप्रत्याहार-ज-ग्रहणेन णिचि अचआदेशो न द्वित्वे कर्तव्ये इति ज्ञापनेनादोषात् नचैवंकृतधातोर्णिचि लुङादौ उपधायाश्चेतीत्वाप्रासत्या अचिकीर्तदिति न स्यादिति चेन्न, ज्ञापकसाजात्यात् यत्र द्विरुक्तावभ्यासोत्तरखंडस्याद्योऽच् प्रक्रियायां परिनिष्ठिते रूपे वाऽवर्णो लभ्यते, तत्रैवोक्तनिषेधः प्रवर्तत इति कल्पनेनादोषात्। एवं च प्रकृते नशब्दस्य द्वित्वे तत उत्तरखंडेऽल्लोपे औननदिति सिद्धमिति दिक् ॥१॥

[अपपटदिति] पटुमाख्यदित्यर्थे णिचि इष्टवद्भावेन नाग्लोपीति सूत्रे प्रत्याहाराश्रयणसामर्थ्याद् वृद्धेर्लोपो बलीयानिति ज्ञापनाट्टिलोपे लुङि तिपिच्लेश्चङि, द्वित्वेऽभ्यासकार्येऽग्लोपित्वात्सन्वद्भावाभावे उक्तं रूपं सिद्धम्। हलिकल्योरदन्तत्व निपातनेन वृद्धौ सत्यां टिलोप इति बोधनात् वृद्धौ टिलोपेऽग्लोपित्वाभावात्सन्वद्भावे इत्वे दीर्घे च अपीपटदिति दिक् ॥२॥

[कंसमजीघनत्] कंसवधमाख्यदित्यर्थे आख्यानात्कृत इत्यादिना णिचि कृल्लोपे प्रकृतिप्रत्यापत्तौ प्रकृतवत्कारके च धातुत्वाल्लुङि तिपि च्लेश्चङि द्वित्वादिकार्ये हनस्तोऽचिण्णलोरिति तत्वे होहन्तेरिति कुत्वे सन्वद्भावादित्वे दीर्घे चोक्तं रूपं सिद्धम्। ननु धातुसंज्ञाऽङ्गसंज्ञा च कंसविशिष्टस्य विहितेतितस्यैव ऊठ् द्वित्वंयुक्तम् किंच धातोःस्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमितिपरिभाषावलात्कुत्वतत्वयोरत्राभाव एवयुक्त इति चेन्न, प्रकृतिवच्च कारकमित्यत्र चकारस्यभिन्नक्रमत्वेन चात्कार्यमित्यर्थे कार्यञ्चकिमित्याकांक्षायां

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

हेतुमण्णिचः प्रकृतेर्हन्यादेर्यादृशं कारकं द्वितीयान्तं धातोरन्तर्भूतं यादृशश्च कुत्सत्वादिकं तदिहापीत्यर्थबोधनेनादोषात् ॥३॥

[अचूचुरदिति] स्वार्थण्यन्ताच्चोरयतेर्हेतुमण्णिचि पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपे धातुत्वात् लुङि तिपि च्लेश्चङादेशे द्वित्वादिकार्ये णौ चङीति ह्रस्वे सन्वद्भावाद्दीर्घे उक्तं रूपं सिद्धम्। न चात्राग्लोपित्वान्नाग्लोपीति ह्रस्वनिषेधः, सन्वद्भावाभावेन दीर्घाभावश्च युक्त इति वाच्यम्। णौ जातिनिर्देशेन णित्वजात्याश्रये परेऽग्लोपिन एव ग्रहणेनादोषादिति मूलाशयः॥४

[औब्जिजदिति] उब्जधातुरुपदेशे दकारोपधस्तत्र भुजन्युब्जौ पाण्युपतापयोरिति सूत्रेण निपातनाद्दस्यवः इदश्चान्तरङ्गमपि द्वित्वविषये दकारोच्चारणसामर्थ्यान्नन्द्राःसंयोगादय इति निषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्तते न तु ततः प्रगिति मूले उक्तम्, एवंच उद्जधातोर्णिचि धातुत्वाल्लुङादौ च्लेश्चङादेशे जिशब्दस्य द्वित्वे ततो निपातनाद्दस्य वत्वे उत्तरखंडे णिलोपे उक्तं रूपं सिद्धम् ॥५॥

[विस्मापयन्] ननु विस्मापयन्नित्यत्र मनुष्यवाचेति करणादेव स्मयसत्त्वेन हेतोः सिंहाच्च तदसत्त्वेन आत्त्वाप्राप्त्या कथं पुगागमः अन्यथा हेतोस्तत्सत्त्वे आत्मनेपदित्वाच्छानजापत्तिरितिचेन्न,विस्मापयन्नित्येव पाठ इति साम्प्रदायिकमते दोषाभावात्, बहुसम्मततथापाठे तु मनुष्यवाक्प्रयोज्यकर्त्री राजानं विस्मापयते तया सिंहो विस्मापयन्निति ण्यन्तात्णौ स्मिप्रकृतिको यो णिच्तदन्तादेवात्मनेपदविधानेन प्रकृते च तदभावेन शता रूपसिद्धेरिति दिक् ॥६॥

[ऐर्ष्यियदिति]ईर्ष्यधातोर्णिचि धातुत्वाल्लुङादौ च्लेश्चङादेशे ईर्ष्यतेस्तृतीयस्येति वार्तिकस्य तृतीयैकाचो द्वित्वमित्यर्थेऽत्राप्राप्त्या चङीत्यनेन द्वितीयैकाचः ष्यिशब्दस्य द्वित्वे हलादिः शेषे उत्तरखंडे णिलोपे. ऐर्षिष्यदिति तृतीयव्यञ्जनविशिष्टस्य द्वित्वमित्यर्थे यिशब्दस्य द्वित्वे ऐर्ष्यियदिति च सिद्धम् ॥७॥

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

[ऊर्णुनविषतीति] ऊर्णुधातोः सनि, सनीवन्तर्धेतीटिणत्वस्यासिद्धत्वान्नुशब्दस्य द्वित्वे विभाषोर्णोरिति वैकल्पिकङित्वेनगुणाभावे उवङिऊर्णुनुविषति, पक्षे गुणेऽवादेशे च ऊर्णुनविषतीति । न चात्रपरत्वाद्गुणावादेशयोःसतोर्नवशब्दस्यद्वित्वेऽभ्यासेउकारोन श्रूयेतेति वाच्यम्, द्विर्वचनेऽचीति सूत्रेणद्वित्वे कर्त्तव्ये स्थानिरूपातिदेशेनादेशनिषेधेन वाऽदोषात् । न च सन्नन्तस्यद्वित्वं प्रति कार्यित्वात्तद्घटकस्येसोपि कार्यित्वात् कार्यी निमित्ततया नाश्रीयतइति परिभाषयानिषेधादिसोनिमित्तत्वाभावेन द्विर्वचनेऽचीति कथंप्रवर्तत इति वाच्यम्, कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते, न त्वननुभवन्नपीति परिभाषया द्वित्वाननुभवकर्त्तुःकार्यिणोनुशब्दस्य निमित्तत्वाभावबोधनेऽपिइ सो निमित्तत्वबाधकाभावादिति दिक् ८

[अरिरिषति] ऋधातोः सनि स्मिपूङ्रञ्ज्वशां सनीतिटि गुणे रपरत्वे रिस्शब्दस्य द्वित्वेऽभ्यासकार्ये धातुत्वाल्लङादौ सिद्धम् । न चात्रद्विर्वचनेऽचीतिनिषेधात्कथं गुण इति वाच्यम्, इसो द्वित्वकार्यित्वेन कार्यमननुभवन्निति परिभाषया निमित्तत्वाभावेनद्विर्वचनेऽचीत्यस्याप्राप्तेरिति दिक् ॥६॥

[उच्चिच्छिषति]उच्छेःसनिपूर्वत्रासिद्धीयमद्विर्वचने इतिबलाच्छाभ्यांसहितस्येटो द्वित्वे हलादिःशेषे च धातुत्वाल्लडादौ उक्तं रूपं सिद्धम् । न च निमित्तापाये नैमित्तिकस्याप्यपाय इति परिभाषया तुको निमित्तस्य छस्य हलादिःशेषेणापाये तुकोऽप्यपायःकथन्नेति वाच्यम्, छ्वोः शूडनानुनासिकेचेति सूत्रेसतुक्ग्रहणेन उक्तपरिभाषाया अनित्यत्वज्ञापनात् । किंच पुष्ययोगं जानाति पुष्येणयोजयतीत्येतत्साधनाय पुष्ययोगे ज्ञीति सूत्रे भाष्यकृतप्रकृतिप्रत्यापत्त्यनुवृत्तिसामर्थ्येनोक्तपरिभाषाया अनित्यत्वज्ञापनात्तस्याप्रसक्तश्चेति दिक्

[यकारवकारान्तानामिति]भाष्ये तु छ्वोरिति सूत्रे ङितीत्यनुवर्तते न वेति विचारे दोषगुणानुद्भाव्य एतावानेव विशेषः अनुवर्त-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

माने ङ्किति प्रष्टेत्यादौ षत्वार्थं व्रश्चेति सूत्रे छग्रहणं कर्तव्यम् अननुवर्तमाने तस्मिन् छः शत्वे शान्तत्वादेव सिद्धे छग्रहणं न कर्तव्यमिति । अथ कैयटः दिवेर्यङ्लुकि ईडभावपक्षे अनुवर्तमाने ङ्किति ऊठोऽप्राप्त्या वलोपे देदेति, अननुवर्तमाने तस्मिन् ऊठि देद्योतीति रूपेऽपि विशेषादेतावानेव विशेष इत्यसंगत्यापत्तौ, ऊठ्भाविनां यङ्लुङ् नास्तीति कल्पनेनादोषादिति दिक्॥११॥

[स्वमनायन]युद्धे योऽयं ग्रामशब्द इत्युक्तेऽपि सामर्थ्यात्संग्राम-शब्दे लब्धे चुरादौ संग्रामयुद्धे इत्यत्रोपसर्गविशिष्टपाठो व्यर्थःसन् उपसर्गसमानाकारं पूर्वपदंधातुसंज्ञाप्रयोजकेप्रत्ययेचिकीर्षिते पृथक् क्रियत इति ज्ञापयति, तेनात्र सुशब्दस्य पृथक्कारे मनश्शब्दादेव-क्यङि धातुत्वाल्लडादावटि च सिद्धम् । न च आ ऊढः ओढः स इवाचर्य औढायित्वेत्यत्र उन्मनाय्य अवगल्भेत्यत्रेव आकारस्य पृथ-क्करणेसमासेऽनञ् पूर्वइति ल्यबापत्तिरिति वाच्यम्,उस्योमाङ्क्ष्वाटः प्रतिषेध इति वार्तिक भाष्याभ्यां ज्ञापकस्य सजातीयविषयत्वेन यत्रोपसर्गरूपं सकलं श्रूयते न त्वादेशेनापहृतन्तत्रैवपृथक्कृतिरिति कल्पनेनादोषादित्यन्यत्सर्वं मूले स्पष्टमिति दिक् ॥१२॥

[दारदयति] दरदोऽपत्यं स्त्रीत्यर्थे द्व्यञ्मगधेति विहितस्याणो ऽतश्चेति स्त्रियां लुक्,दरमाचष्टे इत्यर्थे णिचि इष्ठवद्भावेन पुंवद्भा-वेऽण आनयनादादिवृद्धौ धातुत्वाल्लडादिषु सत्सु सिद्धम् ॥१३॥

[औडिढत] ऊढिमाख्यदित्यर्थे णिचि इष्ठवद्भावेन टिलोपे धातुत्वाल्लुङादिषु सत्सु पूर्वत्रासिद्धीयमद्वित्वे इत्यस्यानित्यतया ढत्वादीनामसिद्धत्वेन ढतिशब्दस्य द्वित्वेकुहोश्चुरितिश्चुत्वे उत्तरखण्डे णिलोप आटि वृद्धौ औजिढदिति । केचित्तु पूर्वत्रा-सिद्धीयमद्वित्वे इति बलादसिद्धत्वाभावेन ढिशब्दस्य द्वित्वेऽ-भ्यासेचर्चेति जश्त्वे औडिढदिति ॥१४॥

[औजढत] ऊढमाख्यदित्यर्थेणिचिइष्ठवद्भावेन टिलोपे प्राप्ते

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

णिचि अच आदेशो न द्वित्वे कर्त्तव्ये इति निषेधे धातुत्वाल्लुङादिषु पूर्वत्रासिद्धीयमद्वित्वे इति बलाड्ढशब्दस्य द्वित्वेऽभ्यासकार्ये आटि वृद्धौ औडढदिति। पूर्वत्रासिद्धीयमद्वित्व इत्यस्यानित्यत्वपक्षे ढत्वादीनाम सिद्धत्वाद्धतशब्दस्य द्वित्वेऽभ्याककार्ये औजढदिति।।१५।।

[त्वापयति] त्वां मां वाचष्ट इत्यर्थे णिचि प्रत्योत्तरपदयोश्चेति मपर्यन्तस्थ त्वमादेशे अतो गुणे इति पररूपात्पूर्वं नित्यत्वाट्टिलोपे वृद्धौ, पुकि सिद्धम् । त्वादयतीत्यादिमूले स्पष्टम् ।।

[इत्याद्युदाहरणविषये] असिद्धवदत्रेत्यनेन टिलोपशास्त्रं प्रति प्रस्थाद्यादेश–विधायकशास्त्रस्यासिद्धत्वात् प्रस्थादावकारोच्चारणाच्च टिलोपाप्राप्तौ प्रेयान्प्रेष्ठ इत्याद्युदाहरणान्यस्य नेत्येवंपरतया भाष्यसंलापादिति ।।१६।।

[शुनयति] श्वानमाचष्टे इत्यर्थे णिचि इष्ठवद्भावेन नस्तद्धित इति टिलोपे भत्वात्सम्प्रसारणे वृद्धावावादेशे च शावयति, प्रकृत्यैकाजिति प्रकृतिभावस्तु न, येन नाप्राप्तिन्यायेन सकललक्ष्यप्रापितस्य टेरित्यस्यैव प्रकृतिभावेन बाधात् । वस्तुतस्तु इष्ठनिदृष्टस्यैव कार्यस्य इष्ठवदित्यति देशेन विधानमिति ब्रह्मिष्ठ इत्यादौ परत्वाट्टेरित्यस्यैव प्रवृत्त्या इष्ठनि नस्तद्धित इत्यस्यादृष्टतया तस्यातिदेशाभावेन टेरित्यनेन प्राप्तस्य प्रकृत्यैकाजिति प्रकृतिभावे सम्प्रसारणे शुनयतीत्येवेति दिक् ।।१७।।

[विदयतीति] विद्वांसमाचष्टे इत्यर्थे णिचि इष्ठवद्भावेन टिलोपे अङ्गकार्ये कृते पुनर्नाङ्गकार्यमिति परिभाषया सम्प्रसारणाभावे विद्वयति । उक्तपरिभाषाया अनित्यत्वादप्राप्तौ सम्प्रसारणे वृद्धावावादेशे विदावयति । नित्यत्वाट्टिलोपात्पूर्वमेव सम्प्रसारणन्ततोऽन्तरंगत्वाट्टिलोपात्पूर्वमेव पूर्वरूपे ततष्टिलोपे विदयतीति मतभेदेन रूपत्रयं बोध्यम् ।।१८।।

[उदैचिचत] उदञ्चमाख्यदित्यर्थे णिचि इष्ठवद्भावेन भत्वादुद

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

ईदितीत्वे धातुत्वाल्लङादौ उपसर्गसमानाकारमितिबलादुच्छब्दस्य पृथक्कारे आटि वृद्धौ चिशब्दस्य द्वित्वे उत्तरखण्डे णिलोपेसिद्धम् १९

[प्रत्यचिचत्] प्रत्यंचमाचष्टे इत्यर्थे णिचि उपसर्गसमानाकारमितिबलात्प्रतिशब्दस्य पृथक्कारे धातुत्वाल्लुङादिषु प्रकृत्यैकाजिति प्रकृतिभावेनांचेष्टिलोपाभावे इष्टवद्भावेन भत्वादच इत्यल्लोपे चाविति दीर्घेऽटि चिशब्दस्य द्वित्वे उत्तरखण्डे णिलोपे इकोऽसवर्णे इति प्रकृतिभावे प्रति अचिचत् पक्षे यणि प्रत्यचिचदिति एवं समि अचिचत् सम्यचिचत् । समः समिरिति सम्यादेशो विशेषः॥२०॥

[तिरायतीति] तिर्यंचमाचष्ट इत्यर्थे णिचितिरस उपसर्गसमानाकारत्वाभावेन पृथक्काराभावेन प्रकृत्यैकाजित्यस्याप्राप्त्या इष्टवद्भावेन अंचेष्टिलोपे नलोपे तस्य वहिरङ्गत्वेनासिद्धत्वात्तिरसस्तिर्यादेशे चिणो लुङ्न्यायेन असिद्धवदत्रेत्यने प्रथमटिलोपस्यासिद्धत्वात्पुनष्टिलोपाप्राप्तौ वृद्धावायादेशे च धातुकार्ये सिद्धम् अङ्गवृत्तिपरिभाषया वा पुनष्टिलोपो नेति केचित् । लुङितु च्लेश्चङि अग्लोपित्वान्नाग्लोपीति ह्रस्वनिषेधे तिशब्दस्य द्वित्वेणिलोपेऽतितिरायदिति२१

[सध्रायतीति] सध्र्यञ्चमाचष्टे इत्यर्थे इष्टवद्भावेनांचेष्टिलोपे तस्य बहिरङ्गत्वादसिद्धत्वात्सहस्य सध्रिरिति सध्र्यादेशे असिद्धवदत्रेत्यनेन प्रथमटिलोपस्यासिद्धत्वात्पुनष्टिलोपाप्राप्तौ वृद्धावायादेशे धातुसंज्ञाकार्येसिद्धम् । लुङितु च्लेश्चङि अग्लोपित्वान्नाग्लोपीति ह्रस्वनिषेधे सशब्दस्य द्वित्वे णिलोपेऽससध्रायदिति ॥

[विष्वद्रायति] विष्वद्र्यंचमाचष्ट इत्यर्थे णिचिइष्टवद्भावेनाञ्चेष्टिलोपे नलोपे तस्य वहिरंगत्वेनासिद्धत्वाद्विष्वग्देवयोश्च टेरित्यद्र्यादेशे असिद्धवदत्रेति प्रथमटिलोपस्यासिद्धत्वात्पुनष्टिलोपाभावे वृद्धावायादेशे धातुसंज्ञाकार्ये च सिद्धम् । लुङि तु च्लेश्चङादेशे अग्लोपित्वान्नाग्लोपीति ह्रस्वनिषेधे विशब्दस्य द्वित्वे णिलोपे अविविष्वद्रायदिति सिद्धम्, एवं देवद्रायति अदिदेव-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

द्रायदिति, अत्र ह्रस्व इत्यनेन ह्रस्वो विशेषः ॥२३॥

अमुमुयश्चमाचष्ट इत्यर्थे णिचि इष्ठवद्भावेनांचेष्टिलोपे नलोपे तस्य बहिरङ्गत्वेनासिद्धत्वाद्विष्वग्देवयोरित्यद्र्यादेशेऽसिद्धवदत्रेति प्रथमटिलोपस्यासिद्धत्वात्पुनष्टिलोपाभावे वृद्धावायादेशे धातु-संज्ञा कार्ये च "अदसोद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्। केचिदन्त्यसदेशस्यनेत्येकेऽसेर्हि दृश्यते" इति मतमाश्रित्य अद-सोसेर्दादुदोम इत्युभयमुत्वे मुत्वस्यासिद्धत्वाद्यणोऽभावेऽमुमु आययति, अन्त्यसदेशस्य मुत्वे अदमुआययति, मुत्वाभावे अदद्राययति, लुङि तु च्लेश्चङादेशेऽग्लोपित्वान्नाग्लोपीति ह्रस्व-निषेधे मुशब्दस्य दशब्दस्य च द्वित्वे णिलोपे आटि वृद्धौ आमुमुमुआयत् आददमुआयत् आददद्रायदिति दिक् ॥२४॥

[कर्त्तरीत्येव भावकर्मणोर्माभूदिति] अयं भावः ननु अनुपराभ्यां कृञइति सूत्रे कर्तृग्रहणानुवृत्तावपि कर्तुः कर्मवद्भा-वेऽनेन परस्मैपदं कथन्नेति चेन्न,कर्मवत्कर्मणा तुल्यक्रिय इत्यति-देशस्य मुख्यतया कार्यस्यैवातिदेशत्वेन अनेन विहितेनात्मनेपदेन परेण परस्मैपदस्य बाधेनादोषात्, न च शास्त्रातिदेशपक्षे आत्मनेप-दविधायकस्य भावकर्मणोरित्यस्य अनेन परत्वाद्बाधात्परस्मैपदं स्यादेवेति वाच्यम्;अनुपराभ्यामिति सूत्रेकर्तरिकर्मेत्यतः शेषात्क-र्तरीत्यतश्च कर्तृग्रहणद्वयमनुवर्त्य कर्तैव यः कर्त्ता न तु कर्मकर्ता-तत्रैव परस्मैपदमित्यर्थेनादोषात्। न चाभेदबाधे पदार्थतावच्छे-दकयोर्भेदस्यैव कारणत्वेन घटो घट इति वदभेदबोधो न स्यादिति वाच्यम्, एकस्य कर्तृपदस्य स्वतन्त्रपरत्वमेकस्य व्यापाराश्रयपरत्व-मिति स्वतन्त्राभिन्नव्यापाराश्रये एवेत्यर्थेनादोषादिति दिक्॥२५॥

[अघानिष्यत] हन्तेः कर्मणि लुङि भावकर्मणोरित्यात्मने पदे मध्ये स्ये स्यसिजिति चिण्वदिटि उपधावृद्धौ हन्तेरिति कुत्वेऽटि सिद्धम्। नच चिण्वदित्यतिदेशेन चिणिदृष्टं यत्कार्यन्त-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

द्विधीयते; एवञ्च अवधीत्यादौ चिण्वधादेशस्य दृष्टतयाऽत्रापि वधादेशः कुतो नेति वाच्यम्, स्यसिजिति सूत्रेऽङ्गस्येत्यधिकारात् चिण्निमित्तकं यदङ्गसम्बन्धि कार्यन्तदेवातिदेशेन विधीयते अवधात्यादौ वधादेशो न चिण्निमित्तक इत्यदोषात् ॥२६॥

[अगारिध्वम्] गिरतेः कर्मणि लुङि ध्वमि सिच् स्यसिजिति चिण्वदिटि ञ्णितीति वृद्धौ वृतो वेत्यनेन चिण्वदिटो दीर्घाप्राप्त्या धिचेति सलोपेऽगारिध्वम्; पक्षे लिङ्सिचोरात्मनेपदेष्वितोटिवृतो-वेतिदीर्घेऽगरीध्वमगरिध्वम्; एषु अचि विभाषेति वैकल्पिकलत्वे विभाषेट इति ढत्वविकल्पे ढधयोर्वस्य मस्य च अनचिच यणो मय इति द्वित्वविकल्पे षण्णवतिः । लिङ्—सिचोरितीडभावे उश्चेति कित्त्वेन गुणाभावे इत्त्वे रपरत्वे हलि चेति दीर्घे इणः षीध्वमिति नित्यढत्वे उक्तसूत्रेण ढवमानां द्वित्वविकल्पेऽष्टौ उक्तेन संकलने चतुरधिकं शतमिति। उदुक्तंमूले इट्दीर्घश्चिण्वदिट्लत्वं ढत्वं द्वित्व त्रिकं तथा इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतमिति ॥२७॥

[प्रकृतो मितां ह्रस्वः] ननु मितां ह्रस्व इत्यतो ह्रस्वपदानुवृत्त्या तद्विकल्पेनैव सिद्धे चिण्णमुलोरितिसूत्रे दीर्घग्रहणं व्यर्थमिति चेन्न, एयंताण्णौपूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिंबाधित्वाणिलोपेलुडादौ स्यसिजितिचिण्वदिटितस्यासिद्धत्वाणिणलोपेशमिताशामितापक्षे शमयितेति। अत्र प्रथमणिलोपस्य स्थानिवत्त्वेन व्यवधानाच्चि-ण्णमुलोरित्यस्याप्राप्त्या उक्तरूपासिद्धेः । कृते तु दीर्घग्रहणे न पदान्तेति दीर्घविधौ तन्निषेधे दीर्घविकल्पसिद्धिरिति पाणिनि-मतम् । भाष्ये तु पूर्वत्रासिद्धे न स्थानिवदित्यङ्गीकृत्य न पदान्त-सूत्रे द्विर्वचनादिग्रहणं प्रत्याख्यातम्, अत्र तु णाविति जातिपर-कनिर्देशेन णित्वजात्याश्रये परे वैकल्पिकह्रस्वविधानादेव सिद्धे दीर्घग्रहणं न कर्तव्यमिति स्वाशयमुद्घोषितवानिति दिक् ॥२८॥

[ननु पचिभिद्योः कर्मस्थेति] अयं भावः तुल्यत्ववव्यव-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

हारस्य भिन्नव्यक्तावेव दृष्टतयाऽत्र तथात्वाभावेन कथं कर्मवद्भाव इति चेन्न विशेषणभेदेन विशेष्यभेदस्य नोक्ते। घटः, पीतो घट इत्यत्र दृष्टतयाऽत्रापि कर्तृत्वसमानाधिकरणक्रियायाः कर्मत्वसमानाधिकरणक्रियायाश्च विशेषेणभेदेन भेदात्तुल्यत्वाद्गतेः॥२६॥

[कर्मणेति किम्] सूत्रे तदसत्वे, साध्वसिश्छिनत्ति, स्थालीपचतीत्यादावसिस्थाल्याव्यापारसत्त्वेनकरणाधिकरणाभ्यां तुल्यक्रियत्वमस्त्येवेति दोषः स्यात् । ननु धातोरेकाच इत्यतो धातोरित्यनुवर्त्य धातोर्वाच्यया क्रियया तुल्यक्रिय इत्यर्थे करणत्वाद्यवस्थायामसिस्थाल्योर्व्यापारसत्त्वेऽपि धातुवाच्यत्वाभावान्न दोष इति चेन्न, गच्छति ग्राम इत्यादौ दोषापत्तेः कृते तु गम्यमानग्रामादिकर्मनिष्ठविशेषप्रयोजककर्मस्थक्रियाया अभावान्न दोष इत्यलम्॥

[अन्योन्यं स्पृशतः] अत्र शब्दभेदेन कर्तृत्वकर्मत्वसत्त्वादेकस्मिन्कर्तरि यैवसंयोगानुकूलक्रिया सैवापरस्मिन्कर्तरीति कर्मस्थक्रियया तुल्यक्रियत्वमक्षतमेव । न चात्र कर्मणि क्रियाकृतविशेषाभावेन कथं कर्मवद्भावप्रवृत्तिरिति वाच्यम्। अन्योऽन्यसंयोगप्रयुक्तहर्षादिजनितरोमाञ्चादेर्विशेषस्य कर्मनिष्ठत्वेनादोषात् । न चात्र सौकर्यविवक्षाया अभावेन कथमस्य प्राप्तिरिति वाच्यम् तद्विवक्षाया अभावेऽपि एतद्वार्तिकारम्भसामर्थ्यात् प्रवृत्तिकल्पनेनादोषात्॥३१॥

[अजां ग्रामं नयति] अत्र कर्मणि गमनानुकूलव्यापाररूपाजानिष्ठफलेन नेतृव्यापारेण वा विशेषादर्शनादिदमुदाहरणं चिन्त्यमिति केचित्, वस्तुतस्तु रज्वा अजायाः कर्षणे कर्मणि विशेषस्यावश्यं भावात्प्राप्तकर्मवद्भावस्यानेन निषेधः॥३२॥

[भूष्यनुभाविणः] अयं भावः उपवासादितपस्तापसन्तपति दुःखयतीत्यर्थे तापसस्य कर्मत्वम्, तापसस्तपस्तप्यतेऽर्जयतीत्यर्थे तापसस्य कर्तृत्वम्, एवञ्च क्रियाभेदात्सकर्मकत्वाच्चाप्राप्ते विधिरिति । भाष्ये तु सकर्मकाणां प्रतिषेधो वक्तव्य इत्यस्य

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

प्रत्याख्यानाय अत्र सूत्रे एवकारसामर्थ्यात्तपेरेव सकर्मकस्य नान्यस्येति नियमार्थत्वमुक्तमिति दिक् ॥३३॥

[व्यकारिष्ट] अत्र णिश्रन्थीत्यादिना आत्मनेपदाकर्मकत्वेन चिणः प्रतिषेधेऽपि स्यसिजित्यादिना चिण्वदिटि वृद्धौ सिद्धम्, पक्षे ह्रस्वादङ्गादिति सिचो लोपे व्यकृतेति ॥३४॥

[याहि याहीति याति]पुनः पुनरतिशयेन वा यानमित्यर्थे क्रिया समभिहारइत्यादिना लोटि ह्यादेशेपरस्मैपद संज्ञायां च क्रियासमभिहारे द्वे वाच्ये इति द्वित्वे याहि याहीति । ततो यथाविध्यनुप्रयोगः पूर्वस्मिन्नित्यनेन लोट्प्रकृतेरनुप्रयोगे तस्मात्संख्याकालयोः पुरुषविशेषार्थस्य च विवक्षायां लडादौ यातीति ततश्च अभेदान्वयतात्पर्यग्राहकेतिशब्दबलात्पुनःपुनरतिशयेन वायानाभिन्नैककर्तृकवर्तमान कालिकं यानमिति बोधः, मध्यमपुरुषस्य बहुवचनंविषये ह्यादेशस्य विकल्पेन विधानात् यात यातेति यूयं याथेति पक्षे बोध्यम् । आत्मनेपदिभ्यो धातुभ्यःस्वविधानात् अधाष्वेत्यादि मध्यमबहुवचनविषयं,स्वस्य विकल्पपक्षे अधीध्वमित्यादि अन्यत्सर्वं सुगमम् ॥३५॥

[पुरीमवस्कन्देति] अत्र समुच्चयेऽन्यतरस्यामिति लोटि ह्यादेशे अवस्कन्देत्यादि समुच्चये समान्यवचनस्येत्यनुप्रयोगात् संख्याकालादीनां बोध इति अवस्कन्दलवनादिरूपाभूतानद्यतनपरोक्षाएककर्तृका अस्वास्थ्यक्रियेति बोधः । अत्र पुनः पुनश्चस्कन्देत्यादिरर्थं इति टीकाकारव्याख्यानन्तु भ्रममूलकमेव द्वितीयसूत्रे क्रियासमभिहार इत्यस्यानुवृत्तेः अनुवृत्तौ तु लोडन्तस्य क्रियासमभिहारे द्वे इत्यनेन द्वित्वापत्तेः । यदपि अवस्कन्देत्यादि मध्यमपुरुषैकवचनमिति प्राचां व्याख्यानन्तदपि भ्रममूलकमेव हि स्वविधानसामर्थ्यात्पुरुषवचनयोरनतिदेशस्य मूले उक्तत्वादिति दिक् ॥३६॥

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

अथ कृदन्तम्

[शतेन वर्या] अत्र शतशब्दोऽनियतपरः कन्याया वरणे वरयितॄणां नियमाभावेनानिरोधस्य सत्त्वदवद्यपण्येत्यादिना वृङो यति गुणेऽटापि सिद्धम्। अत्रानिरोधग्रहणसत्त्वेशब्दसामर्थ्यात् संभक्तिरूपार्थकस्य वृङ एव ग्रहणम्, तदसत्त्वे तु विनिगमनाविरहाद्वृञोऽपि ग्रहणापत्तौ एतिस्तुशास्त्रिति बाधित्वा वृत्येत्यत्रापियत् स्यात् इदन्तु वृत्य इति पुल्लिंगे चरितार्थमिति दिक् ॥३७॥

[भार्या वधूरिति] नन्वत्र संज्ञायां समजेत्यादिना क्यपि तुकि भृत्येति स्यात्, भृञोऽसंज्ञायामित्यत्र संज्ञापर्युदासस्तु पुँसि चरितार्थ इति चेन्न, विभर्त्तेर्भृ इति दीर्घान्तात्क्र्यादेर्वा ण्यति उक्तरूपसिद्धेः क्यप्तु तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणमिति परिभाषया भ्वादि पठितभरतेरेवेति दिक् ॥३८॥

[ह्रस्वः सुपठः] खेयमित्यत्रये विभाषेत्यात्त्वबाधनार्थं प्रश्लेषेणेकारद्वय पाठः, अन्यथा ये विभाषेत्यस्य 'ये' इति विषय सप्तम्याऽन्तरङ्गत्वम्, ईत्वस्य क्यपा सह विधानेन बहिरंगत्वमित्यात्वं स्यादिति सूत्राशयः। भाष्ये तु क्यपा सह विधानादस्यैवान्तरंगत्वम् 'ये' इति परसप्तमीत्याश्रित्य द्वीर्घं प्रत्याख्यातमिति भावः ॥३९॥

[ब्रह्मज्यः] न च कप्रत्यये आकारलोपेनेदं सिद्धमिति वाच्यम् तथा सति संप्रसारणे इयङादेशे च जिय इति स्यात् एरनेकाच इति यण् तु नाशंक्यः ज्याधातोरेव प्रत्ययविधानेनाङ्गस्य एकाच्त्वादिति दिक् ॥४०॥

[भाष्यकारवचनात्] यथा प्रष्ठादयः शब्दाः परित्यक्तस्वलिङ्गाः स्त्रियां वर्त्तन्ते एवमिह श्रीशब्दः परित्यक्तस्वलिंगः सन् कुले वर्त्तत इति तत्र ह्रस्वो नपुंसक इति ह्रस्वः, सुमत्र न अपवादेनाबाधात्, स्वमोर्नपुँसकादित्यमो लुक्। न चैवमपि ग्राम्मन्य इत्यत्रापिसुपो धात्विति लुक् स्यादिति वाच्यम् अभिधानसा-

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

मर्थ्यादेव तद्बाधादिति दिक् ॥४१॥

[निमूलकाषम्] नन्वत्रोभयोर्धात्वर्थयोः कषणरूपतया प्रकारतावच्छेदकविशेष्यतावच्छेदकयोर्भेदाभावेन घटो घट इतिवदभेदान्वयो न स्यादत आह एकस्यापीति, तथा च निमूलादिविशिष्टकषणाभिन्नकषण इत्यादिबोधे घटो नील घटं इतिवद्विशेषणसम्बन्धभेदेन भेदादभेदान्वयोपपत्तिरिति दिक् ॥४२॥

ननु हिंसार्थानां च समानकर्मकाणामित्यनेनैव सिद्धे करणे हन इति सूत्रं किमर्थमिति चेन्न, अनेन णमुल्विधाने तृतीयाप्रभृतीन्यन्यतरस्यामित्यनेन विकल्पेनसमासापत्तेः भिन्नधातुसम्बन्धे एव तेन विधानाच्च ॥४३॥

ननु मूलकेनापदश्य भुंक्त इत्यर्थे मूलकस्य भुजिं प्रति करणत्वेन उपदंशिना सहासामर्थ्यात्कथं प्रत्ययः समासश्चेति चेन्न, मूलकेन-भुंक्ते किंकृत्वा उपदश्य किमुपदश्य अर्थान्मूलकमित्यर्थे कर्मतयाऽन्वयेन सामर्थ्यात्। यदिहि तृतीयान्तेन शाब्देऽन्वये सत्येव प्रत्ययः स्यात्समासो वा भवेत्तर्हि तयावैयर्थ्यं स्यादिति शिवम् ॥४४॥

भालभूषाविधुन्देवं स्मृत्वा शिशुहितैषिणा ।
रचिता तच्छये न्यस्तालभतां ख्यातिमुत्तमाम् ॥ १ ॥
बुद्धिनाथतनूजन्मा दिगम्बर इति स्मृतः ।
तत्तनूजेन संक्षिप्ता हरिशंकरशर्मणा ॥ २ ॥
सर्वतन्त्रस्वतन्त्रस्य श्रीशिवशङ्करशर्मणः ।
कनिष्ठेन च शिष्येण श्रीजयलालशर्मणः ॥ ३ ॥
नन्दलालो विष्णुलालः कनिष्ठौ यस्य सौदरौ ।
कृतिनौ परमश्लाघ्यौ तस्य स्यात्सफला कृतिः ॥ ४ ॥
मिथिलाजनपदे ठाढो प्रसिद्धा बुधसंसदि ।
नगरी यस्य वसतिर्विद्वन्मंडलमंडिता ॥ ५ ॥

इति बटुतोषिणी समाप्ता ।

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

सकलपरीक्षोपयोगिपुस्तकानां

सूचीपत्रम् ।

१	नागेश्वरी टीका सहितः काव्य प्रकाशः		४)
२	फक्किकामर्मविवृतिः,	(वै० सिद्धान्तकौमुद्याः	१)
३	शिशुतोषिणी	(,, सूत्रार्थः)	।।।)
४	शब्देन्दु सुधा	(प्रश्नोत्तरी)	१)
५	परिभाषेन्दु दीपिका	,,	।।)
६	भूषणसारचन्द्रिका	,,	।।)
७	मनोरमारत्नविवेक	,,	१)
८	महाभाष्यकुञ्जिका	,,	१)
९	मुक्तावलीविवृतिः	,, अनुमानखण्डान्ता	।।)
१०	किरातार्जुनीयस्य सर्गत्रयम् (सटीकम्)		।=)
११	रघुवंशस्य सर्गपञ्चकम्	,,	।=)
१२	मेघदूतस्य पूर्वार्धम्		।)
१३	तर्कसंग्रहः सटीकः		≡)
१४	श्रुतबोधः	,,	=)
१५	मञ्जूषारत्नम् (प्रश्नोत्तरी)		।।।)

[परिभाषेन्दुशेखरः कामाख्याटीकासहितः शीघ्रं प्रकाशमेष्यति]

प्राप्तिस्थानम्—

पं० श्रीहरिशङ्कर झा

अन्धराठाढ़ी, दरभंगा ।

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ीगली बनारस सिटी ।

शाखा—

मुरादपुर, बाँकीपुर, पटना ।

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri